Digitized by Arya Samaj Foundation Chennai and eGangotri

MANEESHA

1974

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

111067

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

2413

मनीषा

विधूतमोहा सुरवाचि सक्ता नवीनदृक्चिन्तननिर्निमेषा ।
विमत्सरा सौम्यतया मनोज्ञा प्रवर्त्ततां विश्वहिते मनीषा ॥

प्रथमवर्षे | स्वतन्त्रतादिवसः १९७४ | प्रथमोऽङ्कः

11067

का० सिं० द० सं० विश्वविद्यालयः, दरभङ्गा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111067

मनीषा

कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालस्य त्रैमासिकी मुखपत्रिका

विधूतमोहा सुरवाचि सक्ता नवीनदृक्चिन्तननिर्निमेषा ।
विमत्सरा सीम्यतया मनोज्ञा प्रवर्त्ततां विश्वहिते मनीषा ॥

॥ यां मेधां देवगणाः पितरश्चोपासते, तया मामद्य
मेधयाऽग्ने मेधाविनं कुरु ॥

× × ×

'एका केवलमर्थसाधनविधौ ..... बुद्धिस्तु मागान्मम'

प्रथमवर्षम् | मनीषा | प्रथमोऽङ्कः
स्वतन्त्रतादिवसः १९७४

मङ्लाचरणम्

विद्या विद्यत एव यत्र सततं वेद्यो न यो रागिणां
यं वैद्यं मनसा प्रपद्य विषयव्यालेष्वभीका बुधाः ।
वेदाशेषविचारसीमविलसत्सिद्धान्तभूमिः स मे
विद्युत्य द्यतु हृदयवद्यमखिलं श्रीवैद्यनाथः शिवः ॥

× × ×

श्यामतामरसदामसुन्दरः
पादपङ्कजनमत्पुरन्दरः ।
बर्द्धमानभवदावपावकः
पातु कोऽपि वसुदेवशावकः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकमण्डलम्

१ पं० श्रीशोभाकान्तजयदेवझा
२ प० श्रीकुलानन्दमिश्रः
३ प० श्रीरामचन्द्रमिश्रः
४ डा० श्रीत्रिलोकनाथझा

प्रबन्धसम्पादकः

डा० सच्चिदानन्दचौधरी
कुलसचिवः

सहायकप्रबन्धसम्पादकः

श्री यागेश्वर महतो
पुस्तकालयाध्यक्षः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमः—

१	सेयं कस्यां दिशि०	डा. रामकरणशर्मा	१
२	सम्पादकीयम्		२
३	पत्रमेकम्	प. रामचन्द्रमिश्रः	४
४	चिन्तनीयम्	प. बाबूमिश्रः	८
५	भगवान् पतञ्जलि०	प. कुलानन्दमिश्रः	९
६	न्यायविद्या	प. बुद्धिनाथझा	१७
७	···· विद्यानुरागिता	प. उपेन्द्रझा	१७
८	आत्मनिरासेधर्म०	डा. किशोरनाथझा	१८
९	संस्कृतसाहित्यस्य०	प. जीवनाथझा	३०
१०	मोक्ष एव परमपुरुषार्थः	प. विश्वम्भरझा	३४
११	पाणिनीयं व्याकरणम्	प. श्रीवर्द्धनठाकुर	३८
१२	जीवोपरिग्रहप्रभावः	प. शिवकान्तझा	४२
१३	गाव, प्रतिष्ठाः	प. रामेश्वरचौधरी	४५
१४	कोकिलाजातावपि	ष. भगीरथमिश्रः	५०
१५	शब्दःशब्दार्थौ च काव्यम्	मीनाकुमारी	५१
१६	काव्यलक्षणनिरुक्तिः	प. अर्जुनझा	५२
१७	परमाणोः सावयवत्वनिरूपणम्	प. व्रजकिशोरझा	५९
१८	गौडीयसम्प्रदायेरसविमर्शः	डा. सच्चिदानन्दचौधरी	६१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य

विशालः प्रासादः



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संरक्षकः—

डा० श्रीरामकरणशर्मा

कुलपतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेयं कस्यां दिशि न रमते पण्डितानां मनीषा?

अथायं प्रस्तूयते विदुषां समक्षं मनीषायाः प्रथमस्तरङ्गः। मनीषेयं कल्पतां कल्याणाय समेषां मनीषिणां गीर्वाणवाणीप्रणयिनामित्याशास्ते कामेश्वरसिंह-दरभंगासंस्कृतविश्वविद्यालयपरिवारः।

लोकप्रवृत्तय इव सन्ति विचित्राः प्रवृत्तयो मनीषाणां मनीषिणाम्। तत्र केचिद् 'अइउण्' इत्यारभ्य 'अ अ' इति पर्यन्तं विस्तीर्णादक्षय्यकोषादमरसूत्राणि चायं चायं निर्मिमते रम्याम्बरपरिधानानि गीर्वाणवाण्याः। केचित् पुनस्तान्येव सूत्राण्याधारीकृत्य ग्रथितविचित्रभाषाविज्ञानमाल्याभरणा भूषयन्ति सुरभारतीम्।

केचिच्चिन्तयन्ति कस्मै देवाय हविषा विधेमेति। केचित् पुनर्विभावयन्ति भावना यागानाम्। केषाञ्चिद्दृष्टौ ब्रह्म सत्यं जगन्मिथ्या। केचित् पुनर्जगदेव नित्यमातिष्ठन्ते। केचिद्रमन्ते विचारणासु कारणतानाम्। अन्ये श्रद्धालवः पुनर्न सहन्ते प्रतिष्ठां तर्कस्यैव। केचिद्रमन्ते ग्रहनक्षत्रगतिगणनासु। अन्ये पुनर्दीर्घजीवितीयमधीयते व्यवहरन्ति च। केचित् समुपासते धर्मकथाः सद्भिरद्वेषरागिभिः प्रचारिताः।

केचित् 'को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्' इति समादधते जिज्ञासाः। केचित् पुनर्नमस्कृत्य नारायणं नरं चैव नरोत्तमं वितन्वते युद्धशान्तीनामितिहासकथाः। केचित् कविभणितिषु, केचित्तदुपकरणविचारणासु रमन्तेतराम्। केचित् पुनर्विरञ्चिप्रेयस्यास्तरुणतरशृङ्गारलहरीगभीराभिर्वाग्भिर्विदधति सतां रञ्जनममी'।

इत्येवं मनीषेयं भूमिः समासां मनीषाणां मनीषिणाम्। अधिकुर्वतामेनामलङ्कुर्वतां च सर्वे सुरभारतीप्रणयिनः स्वैः स्वैर्विलक्षणैर्मनीषारत्नैरित्याशास्ते—

रामकरण शर्मा
(कुलपतिः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

इदं युगं सङ्घर्षयुगनाम्ना यद्यभिधीयते तदाऽस्य वास्तविकं नाम कृतं स्यादिति मम प्रत्ययः। एकस्य देशस्य देशान्तरेण, देशस्य मध्ये वर्गविशेषस्य परेण वर्गविशेषेण गृहे पितुः पुत्रेण पुत्रस्य स्वगृहिण्या समं च सङ्घर्षः प्रत्यक्षमुपलभ्यते, जनजीवने कोऽपि कोणएतादृशोऽतीव दुरापो यत्र वस्तुतः सङ्घर्षो न न्यस्तपदः स्यात्। तदेवं सङ्घर्षस्येयं प्रसृमरता स्वाभावकीति कथनं मे न रोचते, नहीतः पूर्वतने काले सङ्घर्षस्य स्थितिरियमासीत्। प्रसृमरताहीयं सङ्घर्षस्य किमपि कारणमनुमापयति। तत्कारणमन्विष्यद्भिः सतर्कमतिभिः प्रयासेऽनुष्ठीयमाने बुद्धिविपर्ययो जनानां तत्र पदेऽभिषेक्तुं शक्यते, यतो विनाबुद्धिविपर्ययं समस्तस्य संसारस्य चेष्टा विपरीतदिग्गामिन्योजायेरन्निति न सम्भवति। सचायं बुद्धिविपर्ययः शिक्षावैगुण्यजनितः। सम्प्रति या शिक्षा विश्वमण्डले सञ्चरति सा स्वार्थभावनां जागरयति नहि वर्त्तमानशिक्षापद्धतौ—'तेनत्यक्तेन भुञ्जीथाः' 'कुर्वन्नेवेह कर्माणि' इति जीवनस्य वास्तविकसफलताया मूलभूतं तत्त्वं पुरः स्थाप्यते। यावत् कालपर्यन्तं त्यागभोगयोः सामञ्जस्यं न सम्पाद्यते कर्मणश्चावश्यकत्वं न स्थिरीक्रियते, तावद्दीयमाना शिक्षा स्वार्थमुद्दीपयन्ती भोगाग्निं प्रबलशिखं कुर्वती च विश्वं सङ्घर्षाय सज्जीकरोति। 'न जातुकामः कामानामुपभोगेन शाम्यति, हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते' इति मनूक्तिर्यावन्न हृदयदेशमाविशति तावत्सङ्घर्षस्य निरासो न कर्तुं शक्यते।

अतः कोऽपि तादृशः प्रकारः शिक्षापद्धतौ सुचिन्त्य समावेशनीयो येन त्यागभोगसामञ्जस्यं शिक्ष्यमाणजनानां हृदयेषु पदमादधीत। सम्प्रति प्रचलन्ती हि शिक्षापद्धतिः संस्कृतं क्वचनैकदेशेश्वसदिवावस्थाप्य विविधानन्यान् विषयान्वृथा महत्त्वमारोप्य च प्रचरति, यावदेषा शिक्षापद्धतिः संस्कृतिमूलभूतान्सिद्धान्तानवलम्ब्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्त्तमाना न भविष्यति, तावदस्य सङ्घर्षभावनाजन्यस्य लोभशिखस्य परस्परविरोध-पल्लवस्य हाहाकारतरोर्मूलं नोच्छेत्स्यते। अतः संस्कृतनिष्ठायाः शिक्षायाः प्रचाराय देशस्य शिक्षामर्मज्ञतया प्रथमाना विद्वांसः शिक्षासंस्थाश्चात्र विषये निरस्तसमस्तपूर्वाग्रहं पुरस्कृतभारतीयशिक्षाप्रकारं समादृतप्राचीनव्यवहारं च प्रयतन्ताम्। नहि पुराणमात्रतादोषेण प्राचीनाशिक्षापद्धतिरवमाननां गम्येतेति युज्यते—'पुराणमित्येव न साधुसर्वं, न चापि चैतन्नवमित्यवद्यम्। सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः' इति। प्राचीनपद्धतौ यावत्यंशे संस्कारोऽपेक्ष्येत तावानंशो योज्यतां, न तत्र दुराग्रहः परमुपयुक्ता तु प्राक्तनी संस्कृतनिष्ठा शिक्षापद्धतिरेवेति भवतु सम्प्रत्ययः। तथास्तु॥ राच०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रमेकम्

[विद्यासम्पदुपेतस्य परदेशे धनोपार्जनपरस्य युवकस्य पत्युः संसर्गदोषसङ्क्रान्तां सुराद्यासक्तिं कर्णाकर्णिकया निशमय्य व्यथमानाया भारतीयललनाया मनोभावाभिव्यञ्जकम् ।]

१

प्रियतम, भवदीयं पत्रमासाद्य हृष्टा
कथमिव निजहर्षं वाचमारोहयामि ।
मम मनसि समिद्धां भावनां ज्ञातुमीशो
मुकुलितनयनस्त्वं द्रागतो निर्वृणोमि ॥

२

चिरमसि परदेशी निर्घृणः स्वप्रियायां
शरदियमपि याता त्वत्प्रतीक्षाकृतो मे ।
कथमिव कथयेयं यातनां स्वानुभूता-
मनतिचिरगतेषु श्रीश्वरीपूजनेषु ॥

३

इहविहरति गेहेऽभावभूमा ततोमे
त्वयि नियमितवृत्ते नोंदयी क्षोभलेशः ।
वहति बहिरदभ्रे मातरिश्वन्युदीते
किमु भवनगताया जातु कम्पो लतायाः ॥

४

प्रहरति न कदाचित्त्वत्कृता मामुपेक्षा
विचलति न च चेतो मे परेषां सुखेषु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दवयति मम धैर्यं, किन्तु लोकैस्त्वदीये
चरितयशसि शुभ्रे क्षिप्यमाणः कटाक्षः ॥

५

श्रुतमिव ममनाथ त्वद्वचः श्रद्दधामि
शिवमिवसततं त्वामन्तरावर्त्तयामि ।
अणुरपि न मदन्तः संशयस्यावकाश-
स्त्वयि कथमपि दूरस्थे कदाप्युज्जिहीते ॥

६

परमसकृदुपेक्षाभस्मना गोपितोऽपि
सततमृजुकमत्या ध्यानतोऽपासितोऽपि ।
ममः मनसि विवेकक्षौमनीरन्ध्रितेऽपि
प्रसृमरपरिवादः पन्निवेशं विधत्ते ॥

७

तरुरिव दृढमूलो मानसः प्रत्ययो मे
बहुविधजनवार्त्तावात्यया चालितोऽपि ।
पतति नहि धरण्यां किन्तुशाखास्तदीया
जनितपतनशङ्कं भाव, कम्पं श्रयन्ते ॥

८

स्फुटवचसि न कश्चित् किञ्चिदाह त्वदीयं
कुचरितमुरुकष्टं भावयित्वा मदीयम् ।
समवहितमनोभिः किन्तुगूढोऽपि भावो
धरपरिसरकम्पोन्नेयरूपत्वमेति ॥

९

इयदवधि धमन्यां मे तदेवास्ति रक्तं
यदुपरि तव रागः स्पष्टलक्ष्यश्चकास्ति ।
तदिदमवसरेऽस्मिन् किञ्चिदाख्यातुमुत्कं
द्रुतहृदयमुदञ्चत् सम्भ्रमं मे विधत्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०

गुरुतरपरिवारान्तर्गताऽप्यस्मि नूनं
समरसभवदेकप्राणताशालिनीति ।
मम भणितिषु यत्नात्काटवं दूरयित्वा
वचननिचयलीनां मे व्यथां भावयेथाः ॥

११

हृदयधन, विदेशे सेवसे सीधु जाम-
न्मदविकृतिदशायां सुन्दरीं वोपयासि ।
व्यथयति मम चेतोऽस्मात्कदाचारतोऽपि
प्रचुरमिह निगूढं कातरत्वं त्वदीयम् ॥

१२

पिबमधु पिबतस्ते ऽहं सहाया भवानि
प्रकटमददशंत्वां वीजयान्यञ्चलेन ।
परमितरकुरङ्गीदृक्प्रियत्वं त्वदीयं
कलुषमिव निजं हा नैव सोढुं क्षमास्मि ॥

१३

ज्वलन इव हृदन्तः कोणगं वृत्तमेतत्
तपति मम मनस्तत्कं ब्रुवे कः शृणोति ।
न भवति रमणीनां प्रीतिपत्रातिरिक्तो
हृदयनिहितभावं बोद्धुमीशोहिलोकः ॥

१४

त्वमसि मम ततोमे पद्मयोनेः परस्यां
बहुविधयुवसृष्टावन्धतेवाविरासीत् ।
समचकलमशेषां भावनां स्वां त्वदेक—
प्रणयनिहितवृत्तिं तां मुधा मा स्मकार्षीः ॥

१५

विषयमिममनिष्टं वक्तुमप्यस्म्यगत्या
प्रकटमिह विधायान्तः सखेदेव जाता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरमपरजनानां वाक्शतेऽविश्वसत्याः
प्रिय मम दयमानः स्वं मनो वेदयस्व ॥

१६

युवतिषु सुभगासु प्रष्ठभावं भजन्त्या
अनुषधि विजलभ्यं प्रेम ते च स्मरन्त्याः ।
मम हृदयमिदानीमीदृशैस्तेऽतिचारै
रशरणमिव शश्वत्कान्दिशीकत्वमेति ॥

१७

सुचिरमपि वियुज्य प्रत्ययेनाश्वसन्ती
रुचिशुचिहृदि भावान्सादरा यानपुष्यम् ।
तइह सपदि लोक व्यक्तसंशीतिभित्ति—
स्खलनविघटमाना मां शुगब्धौ क्षिपन्ति ॥

१८

तदयि दयित, किन्नावेक्षसे स्वं पवित्रं
कुलमनितरलभ्यं शिक्षणप्रांशुभावम् ।
अथ च सुपथगानां जीवितस्य प्रसादं
किमु नयसि विषादं जीवनं मामकं वा ॥

१९

शिवइव गिरिजाया जन्मजन्मानुवन्ध्य-
स्तव पतिरयमेवंमातरः स्वाशिषन्त ।
विगमितसमया चेत्स्यामहं स्वप्रमादे
त्वयि पतति सुदूरं किंकृतं स्याद्विषादैः ॥

२०

सुचिरमहमिहैवाविप्लवायां विपत्तौ
निपतितममुतघ्नात्वां न हातुं क्षमिष्ये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न भवति दमनीयं साहसिक्यं रमण्या
इति सविषमुपेत्य स्वांशमाशु प्रपत्स्ये ॥

२१

विहितपरिकरायां मय्यशेषंजगत्कि
न मम पथिभयं स्यात्कानु वा लोकलज्जा ?
विरमतु कुलवार्त्ता लुठ्यमाने स्वरत्ने
किमु न रहितशङ्कं त्यज्यतां लोकरीतिः ?

रचयिता—रामचन्द्रमिश्रः
सं० शो० संस्थान, दरभङ्गा

—८—

चिन्तनीयम्

सुरालयल्लसद्द्युतिर्निखिलनिर्जरप्रार्थिता
महीतलफलद्गतिः सुकविकालिदासाश्रिता ।
इयं सुरसरस्वती निरवलम्बताभीरुता—
भरेण भुवमद्य हा विजहतीव संलक्ष्यते ॥

रचयिता—श्रीबाबूमिश्रः
सं० शो० संस्थान, दरभङ्गा

—९—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवान् पतञ्जलिर्वेदार्थविचारश्च

(ले०—प० श्रीकुलानन्दमिश्रः)

प्राचार्यः, म० म० लता सं०विद्यापीठम्—लोहना

यथोत्तरं मुनीनां प्रामाण्यं व्यवस्थापयद्भि र्भगवतः पतञ्जलेः सर्वातिशायी वैयाकरणोत्कर्षो व्याकरणनिकाये सर्वैरेव निर्विचिकित्सं स्वीक्रियते। परन्तु म० म० श्रीसीतारामशास्त्रिभिर्विरचिते कलिकातातः प्रकाशिते वेदार्थविचारनामके निबन्धे भगवता पतञ्जलिना कृतायां व्याकरणाध्ययनानुषङ्गिकप्रयोजनप्रदर्शनपरायां वैदिकमन्त्रव्याख्यायामसामञ्जस्यं प्रदर्शितमिति तदेतत्परीक्ष्यते।

एतैर्महानुभावैः सर्वेषामेव वैदिकमन्त्राणां भगवति भास्करे व्याख्यानं सम्भवतीति स्थालीपुलाकन्यायेन प्रदर्शितमत्र ग्रन्थ इति सोऽयमेषां प्रयासः प्रशंसनीयः, किन्तु तदर्थं सायणादिकृतानां व्याख्यानां खण्डनमावश्यकं नास्ति "श्वेतो धावति, अलम्बुसानां याता" इत्यादिवाक्यवदेव वैदिकमन्त्राणामप्यनेकार्थत्वस्य सम्भवात्। सर्वे सर्वार्थवाचका इति सिद्धान्ते हि कस्य वाक्यस्य कोऽर्थो न सम्भाव्यते।

गणानान्त्वेत्यादि यजुर्वेदीयो मन्त्रो भगवतो गणेशस्योपासनायामविच्छिन्नरूपेणातिप्राचीनपरम्परयाऽऽयाति किन्तु तदीया गणेशपक्षीया व्याख्या नाद्यापि दृष्टा श्रुता वा। एवं शनैश्चरस्योपासनायां शन्नो देवीरित्यादेरपि। तादृशी व्याख्या चाद्यत्वेऽपि बहुत्रापेक्षितैवास्ति। अग्निस्तुतिरूपेण वेदभाष्यकारै र्व्याख्यातोऽपि चत्वारिशृङ्गा" इत्यादि ऋङ्मन्त्रो व्याकरणमहाभाष्यपस्पशायां व्याकरणप्रयोजनप्रदर्शनपरत्वेन व्याख्यात एव।

तथैव व्याख्यानान्तरखण्डनमन्तरापि समग्रस्य वेदस्य भास्करपक्षीयं व्यख्यानं बाढं शक्यते निर्वोढुमिति **न तदर्थं सहस्रशिरसः शिरसि समुचितो हस्तप्रक्षेपः**।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं हि तत्र भाष्यम्—

"चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति ॥"

"चत्वारि वाक्परिमिता पदानि" । चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च । "तानि विदुर्ब्राह्मणा ये मनीषिणः" मनस ईषिणो मनीषिणः । "गुहा त्रीणि निहिता नेङ्गयन्ति" गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः । "तुरीयं वाचो मनुष्या वदन्ति" । तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते तच्चतुर्थमित्यर्थः ।

एवं यथास्थितं भाष्यमुल्लिख्य तत्पर्यालोचयन्तस्ते कथयन्ति— "अत्र मन्त्रे पदपदं पदजातिपरम् । नामाख्यातोपसर्गनिपातरूपं पदजातिचतुष्टयं वाचः । मनीषिभिर्यानि विज्ञायन्ते ब्राह्मणैः । तत्र त्रीणि गुहायां निहितानि सर्वेषाम् । वाचश्चतुर्थं तुरीयं पदं मनुष्या वदन्ति । अत्र तुरीयमित्युक्त्या पूर्वोक्तपदचतुष्टयसंख्यापूरकन्तत् । तदपि पदमेव । तच्च मनुष्यैरुच्यते । कथमिदं संभवति पूर्वोक्तपदचतुष्टयस्यापि मनुष्यैः प्रयोगात् । एवं च सति मन्त्रार्थोऽविस्पष्टः तुरीयपदस्य सम्यग् विज्ञानाभावात्" इति ।

पर्यालोचनमिदं पश्यतां स्पष्टमिदं यत् पर्यालोचकमहाशयानां नामाख्यातोपसर्गनिपाताश्चेति चकारे दृष्टिर्नास्ति । मन्त्रे स्थितस्य परिमिता इति पदस्य व्याख्यानमपि तेषां दृष्टौ भाष्ये नास्ति । नामाख्यातोपसर्गनिपातरूपाणि एव पदजातानि यदि विवक्ष्येरन् तदा मन्त्रे परिमिता इति पदस्योपादानं व्यर्थं स्यात् । तस्मात् नामाख्यातोपसर्गनिपाताश्चेत्यत्र चत्वार इति शेषः । अथ वा चत्वारश्च चत्वारि चेति विग्रहे "नपुंसकमनपुंसकेनेत्येकशेषः । तत्र मन्त्रस्थस्य पदानीत्यस्य पदजातानीति व्याख्यानम् । नामाख्यातोपसर्गनिपाताश्च चत्वार इति परिमिता इत्यंशस्य व्याख्यानम् । परिमिता इत्यस्य हि परिच्छिन्नानि इत्यर्थः । परिच्छेदकाश्च नामादयो भाष्यकारेण पदजातैः सह समुच्चीयन्ते । परिच्छेद्यपरिच्छेदकयोश्चैकवाक्यतया प्रदर्शनन्तु उभयोः चतुःसंख्यत्वेन व्याख्यानसौलभ्यार्थम् ।

पदजातानि च पदे स्थानविशेषे जातानीति व्युत्पत्त्या परापश्यन्तीमध्यमावैखर्यः । अत्र मन्त्रे वागिति लुप्तषष्ठ्यन्तं छान्दसं वाक्परिमितेति षष्ठीतत्पुरुषो वा । मन्त्रे परिमिता इति चेन्नोच्यते तदा "परापश्यन्तीमध्यमावैखरीभेदैश्चतुर्धा शब्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राशिः। तत्र परापश्यन्तीमध्यमारूपाः शब्दसमूहाः गुहायामज्ञाने आवृताः। अवशिष्टश्चतुर्थभागरूपः शब्दसमूह एव मनुष्येषु व्यवहारात्मना वर्तते। तद् व्यवहारेण सकलशब्दराशिज्ञानं न सम्भवतीति तदर्थं व्याकरणाध्ययनमावश्यकम्।" इत्येवं ज्ञायमानो मन्त्रार्थो नोपपद्यते वैखरीवाग्रूपस्यापि शब्दसमूहस्य अनन्तत्वेन चतुर्थभागत्वानुपपत्तेः, सति हि चतुर्थभागरूपत्वे सान्तत्वेनानन्तत्वव्याघातात्।

आम्नायते च वैखरीवाग्रूपस्य शब्दराशेरनन्तत्वं महाभाष्ये "बृहस्पतिरिन्द्राय"..... इत्यादिना। तत्र नान्तं जगामेति शब्देन वैखरीवाग्रूपस्य शब्दसमूहस्यानन्तत्वं स्पष्टमेवोच्यते। तस्माद् वैखरीशब्दराशेः परिच्छिन्नत्वमन्तरा तस्य चतुर्थांशत्ववर्णनं न सङ्गतमिति प्रथमतो नामादिभेदैरेव परिच्छेद्यते शब्दराशिः। नामादिभेदैः परिच्छिन्नानां शब्दसमूहानां परादिभेदेन चतुर्धा विभागे मानवव्यवहारविषयाणां वैखरीशब्दानां सकलशब्दराशिचतुर्थांशत्वं निर्बाधमुपपद्यते। न चेदानीं पूर्वोपदर्शितानन्तत्वव्याघातः समूहात्मना परिच्छिन्नत्वेऽपि प्रातिस्विकरूपेणानन्तत्वात्।

तदेवं महाभाष्योक्तं व्याख्यानमतिसमञ्जसम्। प्रत्युत यावदसामञ्जस्यं प्रतीयते तावत्प्रयतितव्यमेव तदीयं तत्त्वं गवेषयितुम्।

मन्त्रे परिमिता इत्यनेन भाष्ये च नामाख्यातोपसर्गनिपाताश्चेति चकारेण सूचितोऽर्थ एव नामादीनामेकैकस्य चतुर्थभागं मनुष्या वदन्तीति कैयटेन नामादीनां मध्ये चैकैकं चतुष्पादमित्युद्द्योतेन चतुष्पादत्वञ्च परादिभिरेवेतिच्छायया च स्फुटीक्रियते।

चत्वारि वाक्परिमिता पदानीति प्रथमपादरूपवाक्यस्य नामादिभेदैः परादिभेदैश्चार्थद्वयवर्णनन्तु नागेशानुयायिनां न शोभते तथासति परिमितपदोपादानवैयर्थ्यापातात् कैयटनागेशाभ्यां तथानभिहितत्वाच्च।

अत्र कैयटग्रन्थं पर्यालोचयन्तो महामहोपाध्यायाः कथयन्ति "अतः (तुरीयपदार्थस्यास्पष्टत्वात्) कैयटेन पदचतुष्टये प्रत्येकं चतुर्थभागं मनुष्या वदन्तीति व्याख्यातम्। तत्र मूले केवलं पदचतुष्टयस्योक्त्या प्रत्येकं भागचतुष्टयकल्पनाऽप्रामाणिकी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पनीया। तुरीयपदस्य मूलगतस्य पदचतुष्टयगतसंख्यापूरकत्वेन कल्पनासामञ्जस्येन मूलतोऽप्रतीतेः" इति।

तत्र पूर्वोपदर्शितदिशा नामाख्यातोपसर्गनिपातभेदैर्भिन्नानां शब्दानां प्रत्येकं परादिविभागो मन्त्रप्रथमभागस्याक्षरार्थ एवेति प्रत्येकं भागचतुष्टयकल्पनाऽप्रामाणिकी कल्पनीयेति कथनं कीदृशम्? परादिगतचतुष्कमेव चत्वारीत्यनेन मन्त्रे समुपात्तमिति तच्चतुष्कसंख्यापूरकत्वं वैखरीशब्दसमूहस्य मन्त्राक्षरादाङ्गस्येन प्रतीयत एवेति न तत्र नवीनं किमपि कल्पयितव्यम्।

उद्द्योतग्रन्थमुद्धरन्तस्ते पर्यालोचयन्ति—

"उद्द्योतकाराः भाष्यगतपदजातानीति पदस्यार्थं ब्रुवते परापश्यन्तीमध्यमावैखर्यः नामादीनि च। एवं च मूलगतस्य चत्वारिपदानीत्यस्य परादिचतुष्टयं नामादिचतुष्टयं चार्थ इत्यर्थः। तत्र मूले सकृदुक्तस्य चत्वारि पदानीति पदद्वयस्यैकविधपदचतुष्टयबोधकस्योभयविधपदचतुष्टयबोधकत्वकल्पनस्य मूलस्वरसतोऽप्राप्तिः। तथोक्तद्विविधपदचतुष्टयमध्ये नामादिरूपं पदचतुष्टयं प्रत्येकं चतुष्पादं चपुष्प्रकारमित्यर्थः। तत्प्रकारगतसंख्यापूरकत्वं तुरीयशब्दस्य। एवं सति असंख्यानि नामादीनि तन्मध्ये स्वल्पान्येव पदानि मनुष्यैरुच्यन्ते सकलशब्दवेदने शास्त्रदृष्ट्या वैयाकरणा एव प्रभव इति तस्यार्थः, तदुक्तं कैयटेन—तत्र चतुर्णां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा वदन्तीति।

एवं सति प्रथमतः पदचतुष्टयद्वयं प्रकल्प्य तन्मध्ये एकस्यैव चतुष्प्रकारता नापरस्येति तन्मध्ये स्वल्पपदानां चतुर्थभागत्वकल्पनेति बहुविधमलौकिकं कल्पनीयं भवति। नामादीनामसंख्यतया प्रयुज्यमानकतिपयनामादीनां चतुर्थभागत्वकल्पनाया असम्भवात्। तस्मादल्पप्रयोगपरत्वं तस्य वक्तव्यमिति न समञ्जसैषा कल्पना" इति।

इदमत्र वक्तव्यम्—पदजातानि परापश्यन्तीमध्यमावैखर्यः इत्युद्द्योतग्रन्थे पदजातानीत्यस्य परापश्यन्तीमध्यमावैखरीत्यर्थः नामादीनि तु मूलोक्तान्येवानूदितानि। अन्यथा पदजातानीत्यस्य नामाद्यर्थकत्वे नामाख्यातोपसर्गनिपाताश्चेति चकारस्यासङ्गतेः। अत एव नामादीनि चेत्युद्द्योतग्रन्थावतरणे भाष्योक्तं विशेषं वक्तुमनुवदतीत्युक्तम्। मूले (मन्त्रे) सकृदुक्तस्य चत्वारि पदानीति पदद्वयस्य पदचतुष्टयद्वयबोधकत्वचिन्ता वृथैव नामादिरूपपदचतुष्टयस्य परिमितपदेनैवलाभादिति निवेदितं प्रागेव। भाष्ये श्रयमाणस्य चत्वारीतिपदस्य पदचतुष्टयद्वयबोधकत्वमप्ये-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कशेषेण प्राक्प्रतिपादितमेव । तत्र चतुर्णा····वदन्ति' इत्यत्र कैयटे पदजातानामित्यस्य स्थाने नामादीनामित्येव पाठःसमीचीनः । अथ वा नामादीनामित्येव तदर्थः । एकं पदचतुष्टयं परिमितपदेन परञ्च मन्त्रस्थचत्वारिपदेन कथ्यते इति न पदचतुष्टयद्वयं कल्पनीयम् । यथा नामादिपदचतुष्टयस्य परादिभेदेन चतुष्प्रकारत्वं तथा परादिपदचतुष्टयस्यापि नामादिभेदेन चतुष्प्रकारत्वं सम्भवत्येव । परन्तु तथा सति परिमितापदेन परादिपदचतुष्टयं चत्वारि पदानीत्यनेन च नामादिभेदेन चतुष्प्रकारत्वं विवक्षणीयमिति न वैखरीवचसां मन्त्रोक्तचतुष्त्वसंख्यापूरकत्वमिति तुरीयं वाचो मनुष्या वदन्तीत्येतदसमर्थितमेव स्यादिति न तथा व्याख्यातम् । पूर्वोपदर्शितदिशा वैखरीवचसां चतुर्थभागत्वोपपत्तौ न तुरीयपदस्याल्पप्रयोगपरत्वं कल्पनीयम् ।

पुनश्चच्छायाग्रन्थमनुधावन्तोलिखन्ति—

"एतदर्थं—(पूर्वोपदर्शितकल्पनाऽसामञ्जस्यनिरासार्थम्) छायाकारेणोद्द्योतस्थनामादिमध्ये एकैकं चतुष्पादमित्यस्य व्याख्याक्रियते चतुष्पादं परादिभिरेवेत्यर्थ इति । तत्रासंख्यनामादिमध्ये कतिपयपरत्वं न तुरीयशब्दस्य किन्तु नामादीनां प्रत्येकं परादयो ये भेदास्तत्रान्तिमभेदो यो वैखर्याख्यस्तत्परत्वं तुरीयशब्दस्येति । तत्रापि पक्षे सकृदुक्तस्य चत्वारि पदानीत्यस्यानेकार्थत्वदोषतोऽनिस्तारः । तस्मान्न व्याकरणरीत्यामन्त्रार्थः समञ्जसः ।" इति

छायोक्तेऽस्मिन् व्याख्यानेऽपि सकृदुक्तस्य चत्वारिपदानीत्यस्य पदचतुष्टयद्वयार्थचिन्तामात्रं पुनः समामनन्ति । तद्विषये चासकृदवोचाम ।

भाष्यकाराभिप्रेतः प्रस्तुतऋङ्मन्त्राक्षरार्थस्त्वेवम्—

वाक्—वाचः शब्दराशेः (सुपां सुलुगितिषष्ठ्या लुक् परिमितपदेन षष्ठीतत्पुरुषो वा) परिमिता = परिमितानि (शेश्छन्दसिबहुलमितिशेर्लुक्) नामाख्यातोपसर्गनिपातैः परिच्छिन्नानि, पदानि = पदजातानि परापश्यन्तीमध्यमावैखर्यः चत्वारि । तानि परापश्यन्तीमध्यमावैखरीरूपाणि, विदुः = जानन्ति ब्राह्मणाः तेषामेव प्रवचनेऽधिकारेण शास्त्राभ्यासबललब्धयोगत्वसम्भवात् । ब्राह्मणा इत्यस्य ब्रह्मज्ञानिन इति वार्थः परावाग्ज्ञानस्यान्येषामसम्भवात् । ब्राह्मणा अपि न सर्वे अपितु मनीषिण एव शास्त्राभ्यासबललब्धयोगा एव अन्येषां सकलशब्दराशेरज्ञानेहेतुमाह—गुहेत्यादि । गुहा = गुहायां [छान्दसम्] त्रीणि परापश्यन्तीमध्यमावाक्स्वरूपाणि । नेङ्गयन्ति = न ज्ञायन्ते, वाचः नामादिभिः परिच्छिन्नस्य शब्दराशेः, तुरीयं = चतुर्थं, भागं मनुष्या अवैयाकरणा वदन्ति व्यवहरन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायविद्या

निबन्धा—बुद्धिनाथझा, न्यायव्याकरणाचार्यः
म० म० लताविद्यापीठम्, लोहना

न्यायविद्या हि आर्याणां प्राचीनासु विद्यासु महत्त्व-मासादयन्ती विद्योतते-तमाम्। सा 'अपवर्गः पुमर्थानां प्रमाणं तत्त्वसम्पदाम्, आन्वीक्षिकी च विद्यानां चतुर्वर्गशिरोमणिः' इत्यमृतोदये शिरोमणित्वेनोपवर्णिता विद्यते। आन्वीक्षिकी त्रयी वार्तादण्डनीतिरिति चतुर्वर्गः, प्रमाणं प्रमाता प्रमितिः प्रमेयम् इति तत्त्वसम्प-च्चतुर्वर्गः, धर्मार्थकाममोक्षाः इति पुमर्थचतुर्वर्गः, इति चतुर्वर्गत्रये शिरोमणिः आन्वीक्षिकीति तदर्थः। 'प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् आधारः सर्वध-र्माणां विद्योद्देशे प्रकीर्तिता' इति न्यायभाष्यम् अस्या विद्याया महिमानमुद्द्योतयत्। 'न्यायविद्या प्रमाणादिभिरर्थैर्विभज्यमाना प्रदीपः सर्वविद्यानां प्रकाशकत्वात् प्रदीपवत्, प्रमाणादिपदार्थप्रतिपादितमर्थमितरा विद्याः प्रतिपद्यन्ते, इतरासु विद्यासु प्रमाणा-दीनि नसन्ति, नसन्ति, इत्याह, कथं न सन्ति—अनधिकारात् न ता विद्याः प्रमा-णेनाधिक्रियन्ते इति, प्रमाणादिप्रकाशिते त्वर्थे ताः प्रवर्तन्ते इत्युपायः सर्वकर्मणामिति, प्रकाशितानां करणादुपायः, यस्मात् प्रकाशितमितरा विद्याः उपकुर्वन्ति, आश्रयः सर्व-धर्माणामिति, सर्वविद्योपकारकत्वादाश्रयः, सर्वासां विद्यानामियमुपकरोति, उपकार-कत्वादाश्रयो राजभृत्यवत्' इति न्यायवार्तिके १ अध्याये २२ पृष्ठे व्याख्यदुद्द्यो-तकरः।

इयं न्यायविद्या मानवीयज्ञानोदयेन सहैवोदयमुपगता। वायुपुराणलिङ्ग-पुराणयोर्मते आदिदेवो महेश्वरोऽस्या विद्याया जनकः। स च विभिन्नकल्पे विभिन्नयुगे विभिन्नरूपेणावतीर्णः सन् स्वशिष्येभ्यः शिक्षां प्रादात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'तदा चतुर्युगावस्थे कल्पे तस्मिन् युगान्तरे भविष्यामि शिखायुक्तः श्वेतो-नाम महामुनिः। हिमवच्छिखरे रम्ये छागले पर्वतोत्तमे, चतुः शिष्याः शिवे युक्ता भविष्यन्ति तदामम, इति वायुपुराणे पूर्वखण्डे २३ अध्याये प्रतिपादितमेतत्। श्रीमद्भागवतमतेतु ब्रह्मा अस्या विद्याया जनकः। 'अन्वाक्षिकी त्रयी वार्ता दण्ड-नीतिस्तथैव च, एवं व्याहृतयश्चासन् प्रणवोह्यस्य दहतः, इति ३ स्कन्धे १२ अध्याये ३ पन्यस्तमस्ति। विद्वत्समाजे तु अक्षपादएवास्या जनकत्वेन प्रसिद्धः। तच्च 'यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतोजगाद' इति न्यायवार्तिक कृदादिमश्लोकादवगम्यते। विभिन्नकल्पे विभिन्नयुगे एतद्विद्यायाः प्रवर्तकाः अन्ये-ऽपि आचार्याः श्वेतदुन्दुभिसुधामोलूकाक्षपादादयः प्रादुरभूवन्।

"श्वेतश्चैव शिखश्चैव श्वेताश्वः श्वेतलोहितः····,
दुन्दुभिः शत रूपश्च ऋचीकः ऋतुमाँस्तथा ॥
····, सुधामाविरजश्चैव शंखः पादव एवच····,
उलूको वैद्युतः सर्वकोह्याश्वलायनः····, ॥
अक्षपादः कणादश्च उलूको वत्स एवच।

इति वायुपुराणे पूर्वखण्डे २३ अध्याये वर्णितम्। किन्तु लिङ्गपुराणे २४ अध्याये कणादश्चेत्यस्य स्थाने कुमारश्चेति पाठः समुपलभ्यते। न्यायविद्याया नाम नैक-विधं निभाल्यते आन्वीक्षिकी, अर्थशास्त्रम्, तर्कशास्त्रम्, हेतुशास्त्रम्, आङ्गिरसी, गौतमीत्यादि। तत्र 'नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः' इति उत्पत्तिदृष्ट्या, एवमन्यत्रापिश्रवणात् अनु—पश्चात, ईक्षा = मननम्, तन्निर्वा-हिका आन्वीक्षिकी, लौकिकालौकिकविषयकविचारस्य शास्त्रम् अर्थशास्त्रम्। एतत्प्र-योगस्तु प्राचीनैर्यत्र तत्र कृतः।

तर्को युक्तिविशेषः तत्प्रतिपादकं 'शास्त्रं' तर्कशास्त्रम्, हेतुप्रतिपादकशास्त्रम् हेतु-शास्त्रम्, अत एव 'त्रैविद्यो हेतुकस्तर्की' इति मनुनाऽभिहितम्। आङ्गिरसस्य इयं विद्या आङ्गिरसी, 'वत्से आङ्गिरसि' इति, गौतमस्येयं गौतमी, 'सखि गौतमि' इत्यमृतोदयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेयं न्यायविद्या सामाजिकराजनैतिकार्थिकसांस्कृतिकोत्कर्षस्याधारः। इयमान्वीक्षिकी तर्कैः सह परनिग्रहायावतरति, यामुपजीवन्ति निज-निजनिःश्रेयससाधनायेतरास्तिस्रो वार्तात्रयीदण्डनीतयः इत्यमृतोदये म० म० गोकुलनाथोपाध्यायोपि प्रत्यपादयत्। एनामाश्रित्य वार्ताविद्याकृष्यादेरुत्कर्षं गमयति, त्रयी विद्यापि यज्ञादिकर्मतः स्वर्गरूपं फलं सम्पादयति, दण्डनीतिविद्यापि सप्ताङ्गराज्यसम्पत्तिं जनयति 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती विद्याह्येताश्चतस्रस्तु धर्मसंस्थितिहेतवः' इति मनुस्मृतिरपि तामेव विद्यां प्रमुखतया आद्रियते। दृष्टार्था तु स्मृतिः काचिददृष्टार्था तथापरा, दृष्टादृष्टार्थरूपाऽन्या न्यायमूला तथापरा, इति भविष्यपुराणम्, 'न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः हेत्वागमसदाचारैर्यद्युक्तं तदुपास्यताम्' इति पराशरोपपुराणञ्च न्यायविद्यामभ्यर्हयति। न्यायविद्यायास्तादृशः सम्मान आसीत्, यत् न्यायविदो दशावरपरिषदि सम्मानिताः सदस्यतां नीताः। 'त्रैविद्यो हैतुकः' इत्यनेन १२ अध्याये मनुना तदभिहितम्।

बृटिशराज्यकालेऽपि कतिपये नैयायिकशिरोमणयः म० म० भवनाथझा प्रभृतयः प्राड्विवाककार्यं सम्पादयितुं सम्मानिताः।

न्यायविद्यायामेवतादृशप्रणाली विराजिता, यदध्ययनकाल एव वादजल्पादि परिज्ञानेन निष्णाताः सन्तोऽन्तेवासिनः जनहिताय देशहिताय परिकल्पिताः। लौकिकाध्यात्मिकाध्ययनाध्यापनेन न्यायविद्याप्रसादात् सर्वत्र शान्तिमार्गः अवलम्बितोऽभूत्। अस्या अध्ययनक्रमो वैज्ञानिकोऽनुकरणीयश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराजाधिराजकामेश्वरसिंहस्य वदान्यता प्रयोजिका विद्यानुरागिता

[ले० पं० श्रीउपेन्द्रझा प्राचार्यः]

रमेश्वरलता सं० म० विद्यालयः, दरभङ्गा

आसीत् खण्डबलाकुलाब्जतरणिः संख्यावतामग्रणी
र्विद्वत्तल्लजभूर्धभिः कृतपदद्वन्द्वप्रतिष्ठोद्विजः ॥
शुद्धश्रोत्रियवंशजः प्रविलसत्कीर्तिर्महेशाभिधो
योऽसौ भारतभूभुजोऽत्र मिथिलाधीशत्वमासादयत् ॥१॥
तद्वंशे क्रमशोबभूवुरतुला भूपाः प्रतापोदिता-
स्तेषु प्राप्तमहोज्ज्वलोन्नतपदोलक्ष्मीश्वरोऽभून्नृपः ॥
तेनाकारि नवं विलासभवनं नाम्ना निजेनान्वितं
दत्त्वा स्वानुजसोदराय च पदं सोऽभून्नृपः स्वर्गतः ॥२॥
तत्सोदरो बुधरमेश्वरसिंहभूपः
प्रापोत्तमं यश इहावनिपेषु मुख्यः ।
स स्वानुरूपसुतसंक्रमितस्वराज्यः
प्रायात्पदं सुकृतिभिः परिमार्गणीयम् ॥३॥
सोऽभून्नृपः सर्वगुणैरुपेतः
कामेश्वरःसिंहयुतः सुकीर्तिः ।
विद्यानिकेतेषु बहुष्वसंख्यं
ददौ धनं भारतसंस्थितेषु ॥४॥
तथापि नातुष्यदसौ महेच्छः
प्राच्यागिरः शोच्यदशां प्रपश्यन् ।
तस्याः समुद्धारकृते प्रधानं
प्रासादमभ्रंलिहमार्पिपत्स्वम् ॥५॥
तत्रैवेमं विश्वविद्यालयं स
प्राच्यावाचः स्थापयामास सम्यक् ।
सोऽयं नाप्नोदुन्नतिं दैवयोगात्
किन्तु प्राप्तः सांप्रतंदक्षहस्तम् ॥६॥
सोऽयं श्रीरामकरणं शर्म्माणं कुलपं बुधम् ।
केन्द्रे न्यातं समासाद्य प्राप्नुयादुन्नतिं पराम् ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मनिरासे धर्मकीर्तियुक्तिः

[डा० किशोरनाथ झा, इलाहाबाद]

योगाचारमतावलम्बिबौद्धाचार्यः धर्मकीर्तिस्तु न्यायवार्तिककृतः उद्द्योतकरतः पूर्ववर्तिबौद्धाचार्यमतानि संरक्षितुं कृतसङ्कल्पः दिङ्नागाचार्यस्यान्तेवासिनः ईश्वरसेनस्य शिष्यतामासाद्य तीर्णशास्त्राम्बुधिः प्रमाणवार्तिकं नामाकरग्रन्थं व्यरचयत्। तत्र स्वसम्प्रदायसिद्धान्तप्रतिपादनपूर्वकं नैयायिकमतनिरासः द्विधा तेन विहितः। विरोधिमतानामयुक्तताप्रतिपादनेन स्वसिद्धान्तानां युक्तया प्रतिष्ठापनेन चैते यथाऽन्यत्र कौशलमात्मीयं प्रादर्शयन् तथा नैयायिकानामात्मनिरासेऽपि उभयविधं प्रयत्नं विदधति स्मेति मादृशं निजबुद्धिशुद्धये समालोचयितुं समाकर्षयति।

[१] तत्र प्रथममात्मज्ञानान्मुक्तिरिति प्रसिद्धतमं नैयायिकादिसनातनधर्मावलम्बिदार्शनिकमतं निराकर्तुमयंकथयति —

"यः पश्यत्यात्मानं तत्राहमिति शाश्वतः स्नेहः।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्थिरीकुरुते" ॥१॥२१८

आत्मदर्शी जनः आत्मनि शाश्वतेन स्नेहेन सम्बध्यते। स्नेहाच्च तत्सुखेषु तृष्णावान् भवति। सतृष्णश्च दोषभाग् जायते। यथा स्नेहाधीनः पुत्रादिसुखे सतृष्णो जनः पुत्रादिषु रागवान् भवति। एवं रीत्या आत्मदर्शनं [आत्मज्ञानं] बन्धायैव कल्पते न तु मोक्षाय।

यद्यपि न काष्ठस्य दर्शनादेव काष्ठे स्नेहो जायते न स्त्रीदर्शनादेव स्त्रियां वानुराग इति यस्य दर्शनं तस्मिन् नियमेन स्नेहो भवत्येवेति नास्ति कश्चिन्नियमः। एवं चात्मदर्शनादात्मनि स्नेहोऽनुरागो वावश्यं भवेदिति वक्तुं न शक्यते तथापि यस्यान्यत्र स्नेहः तस्यात्मनि स्नेहो न भवेदित्यत्रैव किं प्रमाणम्! न च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथात्मनि स्नेहो न भवतीत्यत्र प्रमाणपृच्छा तथा विनिगमनाविरहेण तत्र स्नेहो भवतीत्यत्रैव किं मानम् ? एकत्र पुत्रदर्शनेन पुत्रे स्नेहो जायत इत्युदाहरणमपरत्र च काष्ठदर्शनेन न तत्र स्नेहो भवति इत्युदाहरणमपि तदा तत्र प्रस्तोतुं शक्यमिति वाच्यम् वस्तुस्वभावस्यैवात्र नियामकतया आत्मनि स्नेहसंभवात् अन्यथा पुत्रदर्शनेन तत्र न स्नेहः काष्ठदर्शनेन च काष्ठे स्नेह इति वैपरीत्यमापद्येत। स्वभावस्य च नियामकान्तराभावात्।

न च य आत्मनः उपयोगी तत्र स्नेहो नान्यत्र। अत एवानुपयोगिनि काष्ठे न स्नेहः उपयोगिनि च पुत्रे स्नेहो जायत इति वाच्यम् उपयोगित्वानुपयोगित्वयोः सापेक्षत्वात्। अत एव शीतसमये वह्नितापाय अन्यदा तु पाकेन्धनाय काष्ठस्यात्मन उपयोगितायाः अथ च स्त्रीप्रसङ्गावसरे पुत्रोपस्थितेरनुपयोगितायाः सिद्धतयानिष्टस्यापत्तिरिष्टस्य च हानिरत्र प्रत्यक्षमेवोपलभ्यते। एतेन न्यायभूषणकारस्य भासर्वज्ञाचार्यस्य न्यायशास्त्रस्य काश्मीरप्रस्थानप्रवर्तकस्य कथनम्—पशुस्तृणं दृष्ट्वा न तत् स्निह्यति अत एव यस्य दर्शनं तत्र स्नेह इति धर्मकीर्तिवचनमसमीचीनमिति निरस्तम्। तथा चात्र वार्तिकालङ्कारकारः प्रज्ञाकरगुप्ताचार्यवर्यः—

'स्नेहो दृश्यत एवात्मन्यत्र नास्ति विवादिता।
आत्मस्नेहं विनान्यत्र स्नेह इत्यत्र दुर्घटम्' ॥७९२॥

इयं च युक्तिर्मूलतः वसुबन्धुनाचार्येण समुद्भाविता यस्याः पल्लवनं धर्मकीर्तिनाचार्येण तद्व्याख्याकारेण च विहितमिति तद्ग्रन्थालोचनया ज्ञायते।

न चात्र प्रतिपक्षी ब्रूयात्—आत्मात्मनि स्नेहं कर्तुं न प्रभवेत् सत्त्वविशेषात्। परत्र तु महानुभावतया करुणातो वा स्नेहवानयमात्मा भवति। तदत्रोत्तरमिदम्—आत्मानं विहायान्यत्र स्निह्यतात्मना परोपकारः करिष्यते। तेन च महदपेक्षापूर्वकारित्वं प्रकटितं भवत्यात्मनि। निःस्वार्थस्य परोपकारिणः अदृष्टत्वात्। अपि च—

"नियमेनात्मनि स्निह्यन् तदीये न विरज्यते।
न चास्त्यात्मनि निर्दोषे स्नेहापगमकारणम्" ॥१।२२१॥

आत्मनि हि प्रवर्तमानः स्नेहः न दोषमन्तरेणापैति। न चात्मनि स्नेहवान् आत्मीये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निःस्निग्धो भवति। न वात्मनि स्नेहो न स्यादित्यस्य हेतुरेव तत्रास्ति विद्यमानः। तथा चात्मस्वीकारे सति महान् दोषः उद्देश्यासिद्धिरूपः सञ्जायते। आत्मा बन्धायैव कल्पते न तु मुक्तये। अपि च—

"गुणदर्शी परितृप्यन् ममेति तत्साधनान्युपादत्ते।
तेनात्माऽभिनिवेशो यावत् तावत् स संसारे" ॥१।२२९॥

इति कारिकया धर्मकीर्तिस्तु उच्चैः कथयति यत् सत्यात्मनोऽङ्गीकारे निर्वाणं कदापि न स्यात्। अशुचिमनिष्टमपि शुचितयेष्टतया वा पश्यन् तत्र सतृष्णः ममेदं सुखमिति मन्यमानः तत्साधनानि गर्भगमनादीनि समुपादत्ते।

एवञ्चात्मनोऽभिनिवेशः संसारमेव संपादयति न निर्वाणम्। अपि च न केवलं जन्मप्रबन्ध एवात्मदर्शने सति दोषः अपि तु रागद्वेषमूलकानां समेषां दोषाणामापत्तिर्भवति। यतो हि आत्मनः सत्तास्वीकारे सति ततोऽन्यस्मिन् परबुद्धिर्जायते। तस्मात् स्वपरयोर्विभागात् स्वस्मिन् द्वेषश्चोपजायते। तन्मूलकाश्च सर्वे दोषाः निश्चयेनापतन्ति। इमामेव वार्तां कारिकयानया स्फुटयति धर्मकीर्तिराचार्यः—

"आत्मनि सति परसंज्ञा स्वपरविभागात् परिग्रहद्वेषौ।
अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते" ॥१।२२०॥

[२] बुद्ध्यादेर्गुणस्याश्रयतयात्मनो गुणिनः सिद्धिरिति वदतां नैयायिकानां मतं प्रत्याख्याति धर्मकीर्तिराचार्यः। तथा हि—

"अनाश्रयात् सदसतोर्नाश्रयः स्थितिकारणम्।
सतश्चेदाश्रयो नास्याः स्थातुरन्यतिरेकतः ॥१।६५॥

अयमाशयः—आश्रयः सतो वा पदार्थस्यासतो वेति विप्रतिपत्तौ न प्रथमः कल्पः संभवति स्थातुः स्थितेरभेदस्यैवाङ्गीकारात्। गुणगुणिनोः क्रियाक्रियावतोश्च भेदस्य बौद्धैरनभ्युपगमात्। न वात्र द्वितीयः कल्पः संभवति असतः स्वरूपाभावेनकस्य हि को वाश्रयो भवेत्?

किं च यदि नाशहेतुना नाशो भवति किमत्र स्थितिहेतुनाश्रयेण। यावन्नापतति स्थितिहेतुस्तावत् स्वयमेव स्थास्यति बुद्ध्यादिः आपतिताश्च तस्मात् नैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
2713

रक्षणक्षम इति किमनेन स्वीकृतेन ? न च नाशकागमनं यावत तस्मात आश्रयात स्थानं चेदिष्यते एवं तर्हि वस्तुधर्मता नाशस्य सिद्धयति नत्वाश्रयसिद्धिः । एवं रीत्या सामान्यत आश्रयत्वप्रतिषेधे हि कथं बुद्धयादीनामाश्रयतयात्मनः सिद्धिरिति हृदयम् ।

अपि च विशेषेणापि हेतुनाश्रयस्यासिद्धिरेव । तथा हि प्रसर्पणधर्माणां जलादीनामाधारतया कुण्डादिर्घटादिर्वा गमनप्रतिबन्धाद्धेतोः स्थैर्यसम्पादनायाश्रयतयाभ्युपगम्यते । अगतीनां गुणकर्मादीनां निष्क्रियतया किमाश्रयेण प्रयोजनं सिद्धयेदिति इच्छादीनां गुणविशेषाणामाश्रयतयात्मसिद्धिर्न संभवति । तथा चोक्तं धर्मकीर्तिः—

111067

स्यादाधारो जलादीनां गमनप्रतिबन्धनः ।
अगतीनां किमाधारैर्गुणसामान्यकर्मणाम् ॥१।७०॥

ननु सति कुड्ये चित्रं दृश्यत इति पामरजनविदितमेव साक्ष्यमादाय आश्रयाश्रयिभावः सिद्धयति । भूतान्युपादाय रूपस्योत्पत्तिस्तु बौद्धानामप्यनुमतं मतम् । ततश्च कथमाश्रयाश्रयिभावस्य निषेधो युज्यत इति धर्मकीर्तिः कथयति—भूतानि हेतूकृत्य रूपस्योत्पत्तिर्भवतीत्येतावता भूतेषु रूपाधारता न भवति अपि तु तद्धेतुता केवलं विवक्ष्यते । यद्वा एकसामग्र्यधीनतैव भूतचतुष्कैः साकं रूपादेराश्रयाश्रयिभावतां भजते इत्यभ्युपगमवाद एष न तु सिद्धान्तः इति ध्येयम् । भूतचतुष्करूपयोः परस्परं विभागाभावेन रूपस्याश्रयिता भूतचतुष्कस्य चाश्रयता परिकल्प्यते—

तदुपादायशब्दश्च हेत्वर्थः स्वाश्रयेण च ।
अविनिर्भागवर्तित्वात् रूपादेराश्रयोऽपि वा ॥१।१६२॥

इति कारिकया धर्मकीर्तिना तथैव प्रतिपादनात् । वसुबन्धुराचार्यस्तु अस्योत्तरमेवं ददाति यथा काष्ठप्रतिमा काष्ठतो न भिन्नं वस्तु केवलं नेयं मृण्मयी प्रतिमा इति व्यावर्तयति तथैव कुड्यतो न भिन्नं चित्रं केवलं चित्रविरहितकुड्यतो भिन्नमिति मत्वा तत्राश्रयाश्रयिभावमतद्व्यावृत्त्या निरस्यति ।

यदि च मद्यतो भिन्नां मदशक्तिं कनकतो भिन्नामुन्मादशक्तिं च वीक्ष्य रूपादीनामाधारं भूतचतुष्टयं सुखादीनां चाश्रयमात्मानमङ्गीकरोति नैयायिकस्तस्यानुभव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धस्यापलापेनाश्रयत्वस्य निरासो नैव संगच्छते बौद्धानामिति चेदत्र धर्मकीर्तिः कथयति—मदशक्तिर्मद्यतो न भिन्ना शक्तिरूपस्यार्थक्रियाकारित्वस्य वस्तुस्वभावत्वेनानुभूयमानत्वात्। शक्तिः शक्तिमतोऽर्थान्तरं वस्तु न भवति। तथा च कारिका—

मदादिशक्तेरिव चेद् विनिर्भागो न वस्तुनः।
शक्तिरर्थान्तरं वस्तु नश्येन्नाश्रितमाश्रयेत् ॥१।१६२॥

तथा च नाधाराधेयभावः संगच्छते नैयायिकस्य।

यदि च शक्तिशक्तिमतोर्भेदाभावे बह्नौ मन्त्रौषधादिना कः प्रतिरुध्यते इति जायते जिज्ञासा। न तावत् बह्निरन्यत्र बह्निना दाहस्य दर्शनात्। न वा तस्य दाहकत्वशक्तिस्तस्य अनभ्युपगमादिति तयोर्भेदेन विना नैतदुपपद्यत इति, तदा मन्त्रौषधादिना वस्तुनोऽग्नेरेव प्रतिरोधाभ्युपगमेनोक्तदोषाभावात्। अत एव यदौष्ण्यम् तदेवाग्निः य एवाग्निस्तदेवौष्ण्यमिति औष्ण्यस्य काष्ठभेदेन तारतम्येऽपि न ततोऽग्निर्भिद्यत इति निश्चयः। तथा च शक्ति शक्तिमतोरभेदाङ्गीकारेण शक्तिमतो नाशेन तत्स्वभावरूपायाः शक्तेः स्वत एव नाशात्।

अपि चाश्रयाश्रयिभावाभ्युपगमे महाननर्थ आपद्यते। तथा हि भावः नश्वरस्वभावोऽविनश्वरस्वभावो वेति विप्रतिपत्तिः। अविनश्वरस्वभावस्य भावस्य नाशो न भवतीत्युच्यमाने अपूर्वत्वं नायाति सर्वैरविनश्वरस्य नाशानभ्युपगमात्। अथ नाशहेतोः मुद्गरादेः समवधाने सति तस्य नाशः संभवतीत्युच्यते किं स्थितिहेतुनाश्रयेण?

यदि च नश्वरस्वभावः तर्हि कारणेन विनापि विनश्येदेव तादृशस्वभावत्वात् किं स्थितिहेतुनाश्रयेण क्रियते। आश्रयोऽपि नश्वरस्वभावं भावं कथं स्थापयितुं प्रभवेत्। तथा हि धर्मकीर्तिरत्र—

परतो भावनाशश्चेत् तस्य किं स्थितिहेतुना।
स विनश्येद् विनाप्यन्यैरशक्ताः स्थितिहेतवः ॥१।७२॥

अपि च यदि सर्वो भावः साश्रयः स्यात् तर्हि कश्चिन्नित्याश्रयः सुखादिरात्मायितः कश्चिदनित्याश्रयः शुक्लत्वादिःकार्यद्रव्यायित इति तारतम्यं न भवेत्। सर्वो नित्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिमान् भवेत् स्थापकस्य सर्वदा स्थितेः। सर्वो हि भावः स्वसमवायिकारणे अवस्थितः साश्रयतां भजते इत्याश्रयावधिरापरमाणुः स्यात् तस्य नित्यतया तत्कार्याणि नित्यानि भवेयुस्तदाश्रयाणां गुणानामपि नित्यत्वापत्तिः स्यात्। तथा चात्र धर्मकीर्तिः—

स्थितिमान् नाश्रयः सर्वः सर्वोत्पत्तौ च साश्रयः।
तस्मात् सर्वस्य भावस्य न विनाशः कदाचन ॥१।७३॥ इति

एवञ्चाश्रयाश्रयिभावाङ्गीकारे सकलपदार्थानां नित्यत्वापत्तिः। उपसंहर्तुकामोऽत्र धर्मकीर्तिः स्वमतपुष्ट्यर्थमाह—

स्वयं विनश्वरात्मा चेत् तस्य कः स्थापकः परः।
स्वयं न नश्वरात्मा चेत् तस्य कः स्थापकः परः॥

तस्मान्न सिद्ध्यत्याश्रय इति पक्षधर्मताबलेनेच्छादिभिर्हेतुभिरात्मनोऽनुमानं नैयायिकस्य न संगच्छते। गुणानामाधारस्यैवाप्रसिद्धेरिति हृदयम्।

नन्वात्मनि सति बन्धः मोक्षश्च तस्य जायते। तदभावे कस्यबन्धो मोक्षो वा भवेदिति आत्मसत्त्व एवोपपद्यते बन्धमोक्षव्यवस्था। अत्र धर्मकीर्तिः कथयति— आत्मसत्त्वे नैयायिकानामात्मा नित्यः व्यापकश्च स्यात्। एवं सति तत्रान्वयव्यतिरेकौ न संभवतः। तत्सत्त्वे तत्सत्तारूपान्वयस्य संघटनेऽपितदभावरूपव्यतिरेको न संघटते। नित्यस्य व्यापकस्य चाभावोऽप्रसिद्ध इति दुःखोत्पादकत्वं न तस्य स्यात्। तदभावो बन्धस्तस्य न भवेत् बन्धाभावे च कस्मान्मुक्तिरिति। अपि च यदि स्वतन्त्रः शक्तश्चात्मा भवेत् कथमात्मनो दुःखमुत्पादयेत्? न खलु स्ववधाय कृत्योत्थापनं युक्तंप्रेक्षावतः। यदि चायं मूढः तदात्मानमजानानः कथमात्मा? अनुपलम्भादसत्त्वमेव स्यात्तस्य। यदि चायं दुःखोत्पादसमर्थस्वभावस्तदा सर्वदा दुःखमेवोत्पादयेत् न कदापि मुक्तिः स्यात्। यद्ययं न दुःखोत्पादसमर्थस्वभावस्तदा मुक्तिरेव स्यात् न बन्धव्यवस्था। तस्मात् बन्धमोक्षयोरुपपत्तये आत्माभाव एव श्रेयस्करः—

दुःखोत्पादस्य हेतुत्वं बन्धः, नित्यस्य तत्कृतः।
अदुःखोत्पादहेतुत्वं मोक्षः, नित्यस्य तत्कृतः ॥१।२०३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति कारिकया स्फुटमस्यैव प्रतिपादनात् ।

किं च यदि बुद्धीन्द्रियशरीरादीनां दुःखहेतुत्वात् तेषु वैराग्यात् तत्त्यागात् कैवल्यमात्मनः दृष्टम् । मुक्तिदशायां तदात्मभोगादिसकलपरिच्छेदाभावात् नाशाविशेषात् नाश एवेष्टः स्यात् । तच्चायुक्तं यस्य यः प्रियो भवति स तस्य कथं नाशमिच्छेत् । बलवानात्मस्नेहो विशिष्टसुखसाधनस्यालाभे सुखाभासहेतौ च प्रवर्तयति ।

न च यद्यात्मा नाभ्युपगम्यते तदा अन्येनानुभूतं कर्म कथमन्यः स्मरति फलं वा भुंक्ते इत्यतिप्रसङ्गः अत्र धर्मकीर्तिः कथयति वस्तुधर्मो ह्येष यदनुभवः पटीयान् स्मरणबीजाधानेन स्मरणं जनयति । शुभाशुभाश्च चेतनात्मकाः संस्कारं संविदं प्रवर्तयन्ति तत्किं स्मर्तृभोक्तृदुराग्रहेण ॥ तत्तदाकारः प्रतीत्यसमुत्पन्नः बुद्धिप्रवन्ध एव केवलः न तु संसारी कश्चित् ।

"अन्यस्मरणभोगादिप्रसङ्गाश्च न बाधकाः ।
कर्तृभोक्तृत्वहानिः स्यात् सामर्थ्यं च न सिद्ध्यति" ॥१।२७१॥

न चात्मानमन्तरेण कथं संसारप्रवर्तनम् ? आत्माभावे सत्कायदर्शनस्याभावादिति वाच्यम् , धर्मकीर्तिरत्राभिलपति—न परमार्थतः संसारो नामास्ति स्वरूपस्य स्वतो न परमार्थतः संसारोनास्ति, स्वरूपस्यस्वतो गतिरिति वचनात् । तथापि व्यवहारत एतदेवं भवति—

"स्थिरं सुखं ममाहं चेत्यादिसत्यचतुष्टये ।
अभूतान् षोडशाकारान् आरोप्य परितृप्यति" ॥१।२७२॥

अपि च प्रत्यभिज्ञा किं साधयति ज्ञातमथ ज्ञातयोर्मध्यभावि ? यदि ज्ञातं स्यात् तदा ज्ञानेनैव प्राक्तनेन साधितं स्मरणेन व्यवहृतम् , कस्तत्र प्रत्यभिज्ञाया उपयोगः ? प्रत्यभिज्ञयेदानीमपि तदस्तीति साध्यते । स्मरणं तु तत्कालमेव साधयति यथादृष्टस्य स्मरणात् । अत एव प्रशाकरगुप्ताचार्यः—

"यदि स्मरणसद्भावात् प्रत्यभिज्ञा प्रवर्तते ।
स्मृतेऽर्थे प्रत्यभिज्ञानमनिन्द्रियजमेव तत् ॥४०२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न चाक्षजस्मृती उक्त्वा प्रत्ययः पर इष्यते ।
तेनाक्षजत्वाभावेन स्मरणस्याप्रमाणता" ॥४०३॥

इति रीत्या प्रत्यभिज्ञानिरासे सति नैयायिकानां प्रत्यभिज्ञया स्थिरस्यैकस्य नित्यस्य चात्मनः सिद्धिर्न संभवतीति हृदयम् ।

[३] एवं नैयायिकानामनुमतमात्मसाधनकानुमानं निरस्य इदानीं स्वसिद्धान्तं विवरीतुकामः धर्मकीर्तिः चतुरार्यसत्यान् दीपयन् आत्मस्थानीयान् पञ्चस्कन्धानङ्गीकरोति । तत्र प्रथमं दुःखस्वरूपं निरूपयन्—

"दुःखं संसारिणः स्कन्धाः रागादेः पाटवेक्षणात् ।
अभ्यासान्न यदृच्छातो ऽहेतोर्जन्म विरोधतः" ॥१।१४९॥

इति कारिकामवतारयति, अथ च निजशास्त्रानुरूपां प्रतिज्ञां पुरतो ऽस्मदादीनां प्रस्तौति । नैयायिकानामात्मा यथा जन्ममरणप्रबन्धादिरूपं संसारमनुभवन् संसारो ऽस्यास्तीति व्युत्पत्तिभाजनं संसारिपदं लभते तथा बौद्धानां तु स्कन्धा एव संसरणशीलाः सन्तः संसारिपदं लभन्ते । संसरणादेव च ते दुःखमनुभवन्ति इति कारिकाप्रथमचरणाभिप्रायः । संसारे संसरणं च तेषां रागाज्जायते इत्यत्र नैयायिकबौद्धयोः स्फुटं साम्यम् । **विरक्तजन्मादृष्टेरिति** (प्र० वा० १।१८८।) धर्मकीर्तिकारिकांशः **वीतरागजन्मादर्शनात्** इति न्यायसूत्रानुवाद एव विद्यते ।

यद्यपि प्रज्ञाकरगुप्ताचार्यः वार्तिकालङ्कारामिधे भाष्ये कथयति—ननु रागो ऽभिमतवराङ्गनाङ्गालिङ्गनतया सुखहेतुत्वात् सुखमेव । द्वेषो ऽपि वैरिनिराकरणकारणतया सुखस्यैव प्रयोजकः मोहस्तु सत्कार्यदृष्टिलक्षणो ऽहंकारमानसदर्पहेतुः सुखस्य कारणमिति सुखमेव । एवं रागद्वेषाद्याधारभूताः शरीरादयो ऽपि तथैव प्रतीयन्ते । यदपि क्षुधादिदुःखं तदपि महतस्तृप्तिसुखस्य हेतुरिति न दुःखं नाम जगति विद्यते । तत्थ कथं "दुःखं संसारिणः स्कन्धाः" इत्युक्तमिति चेदत्र समाधानम्—

"संसारवर्त्मसंसर्गपरिश्रान्त्या सुखक्षताः ।
स्कन्धा एव महादुःखमविद्या त्वन्यथेक्षते" ॥६३४॥

अभ्यासहेतुको रागः सुखं च तदनन्तरम् ।
न तु स्वभावतो ऽभ्यासभावाभावानुवृत्तितः" ॥६६५॥ [प्र० वा० अ०]

CC-0. Vasishtha Tripathi Collection. Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यासात् राग उत्पद्यते न तु यदृच्छया। अन्यथा नित्यास्ते भवेयुः। अभ्यासश्च पाटवादिदर्शनात्। पाटवदर्शनं च जन्मान्तरानुभूतस्य। पुनरस्मादेव च रागात् स्कन्धा जन्माददते ततश्च दुःखम्—इति सङ्गतं रागात् जन्म ततो दुःखमित्यभिप्रायकं—"दुखं संसारिणः स्कन्धाः" इति। 'रागादेः पाटवेक्षणात्, अभ्यासात् न यदृच्छातोऽहेतोर्जन्मविरोधतः इत्यंशस्तु हेतुरहितस्य च जन्म न भवति, न वा जन्म वस्तुस्वभाव इति प्रतिपादयति। तथा च कारिकयानया प्रतीत्यसमुत्पादवादः बौद्धस्य प्रथिततमः सिद्धान्तः प्रतिपन्नो भवति।

इदमत्रावधेयम्—नैयायिकस्येव बौद्धस्यापि प्रक्रियैक्यं विद्यते अभिमतविषयप्रार्थना रागः। स च पूर्वजन्मानुभूतस्यैव भवति तस्माच्च जायते जन्म ततो दुखःमिति। केवलं जन्मवानत्र पञ्चस्कन्धात्मको भवति तत्र तु आत्मपदवाच्य इति। उभयत्रैव हि रागस्यैवोच्छेदाय दृश्यते प्रयत्नः। तथा चात्र प्रज्ञाकरगुप्ताचार्यः—रागस्य कारणमभ्यासस्तस्य परित्यागे सति स्वत एव रागानुत्पत्तिस्तदभावे च जन्माभावस्ततो दुःखाभाव उपपन्नो भवति। यथा क्रीडासक्तो बालः क्रीडातो मनो निवर्त्यान्यत्र विद्याव्यवसायादिषु दत्तावधानो भवति परिणतिसुखं च लभते तथा रागादौ औदासीन्यं भजमानः तत्त्वाभ्यासे संलग्नः मध्यममार्गगामी निर्वाणपथमधिरोहति।

यदिचात्र शङ्का भवेत् रागस्य सकारणकत्वे निर्द्धार्यमाणेऽपि पूर्वजन्माभ्यास एव तद्धेतुरिति कथं निर्णीयते? भूतचतुष्टयमपि तस्य कारणं भवितुमर्हति। यथा धावल्यादिगुणानामाश्रयः पृथिव्यादिभूतं तेषां कारणमपि भवति तथा रागस्यापि आलम्बनं भूतचतुष्टयं हेतुत्वेन वक्तुं शक्यम्। तदात्र प्रधर्मकीर्तिः तिविधत्ते आश्रयस्य पूर्वं निरसनेन धावल्यादेरपि भूताश्रयत्वाभावेन दृष्टान्ताप्रसिद्धया भूताश्रयत्वस्य रागादौ भ्रान्तित्वापत्तिः।

एतेन भूतधर्मत्वं निषिद्धं निःश्रयस्य च।
निषेधान्न पृथिव्यादिनिश्रिता धवलादयः॥ १। १५९॥

न च भूतान्युपादाय रूपादय इत्युरीक्रियते अतएवोपादाय प्रज्ञप्तिःप्रसिद्धयति। तथा च कथमाश्रयप्रतिषेधः इति वाच्यम्, उपादायार्थस्य हेत्वर्थावग-

CC-0.In Public Domain. Panini Kanya Maha Vidyalaya Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात् आश्रयार्थप्रतिषेधस्य युक्तत्वात् । तथा च कारिका—

तदुपादाय शब्दश्च हेत्वर्थः स्वाश्रयेण च ।

अविनिर्भागवर्तित्वात् आश्रयोयुक्तमन्यथा ॥१॥१६०॥

एतेन भवतु भूतचैतन्ययोः परस्परं भेदः तथापि न प्रतीत्यसमुत्पादवादस्य सङ्गतिः । पूर्वजन्मनि विश्वासाभावेन तादृशाभ्यासाप्रसिद्धिस्तथा च शरीरमेव राग-मुत्पादयतु तच्च शुक्रादिना समुत्पन्नं भवति इति लौकिकानामप्यनुभूततयानुमतमेव भवेत् । एवञ्च न खलु कष्टसाध्यस्य निर्वाणस्य प्रयोजनं वर्तते । सुखादिभोग एव परमार्थसत्यमिति वदतां सुखं विहितम् । यदि जन्मान्तरं न स्यात् तर्हि यथा रूपादि अभूत्वा भवति तथा रागोऽपि भवेत् । नचैवं जायते । यथा च धाव-ल्यादिकं विहाय भूतमवतिष्ठते तथा वीतरागस्यापि जन्म न भवतीति भेदस्तयोः प्रत्य-क्षगोचर एव । अतएव जन्मान्तरमभ्युपगन्तव्यमेव, तदभ्यासेन चेह जन्मनि रागी भवति । फलतः रागस्य वासनाप्रतिबद्धजन्मता युक्तिशतेनाप्यपहस्तयितुं न शक्यास्ति । नैयायिकेन साकमिह बौद्धस्य मतसाम्यं लक्षितं भवति । वीतराग-जन्मादर्शनादितिन्यायसूत्राभिप्रायस्यात्र स्फुटं परिष्कारो दृश्यते ।

न चैतावता प्रबन्धेन स्कन्धानां जन्मनः सिद्धावपि पुनर्जन्म न सिद्ध्यति उपा-यशतेनापि, नहि केनचिद् दृष्टं पुनर्जन्मेति वाच्यम्, अदर्शनेन वस्तुनोऽसत्त्वं न कल्पनीयम् अपि तु दर्शनसामग्रीविरहात् तत्र तददर्शनमिति विभावनीयम् । मन्द-नेत्रस्य पुंसः स्वल्पधूमस्यादर्शनेन न धूमस्य तत्राभावः कल्पयितुं शक्यः । ज्यो-तिष्मता चक्षुषा तत्रैव तदुपलब्धेः । एवमन्तराभवशरीरमपि सूक्ष्मत्वान्नोपलभ्यते । न चैतावता तदभावस्तत्र, इन्द्रियस्य तादृशसूक्ष्मशरीरग्रहणेसामर्थ्याभावात् ।

तथा हि अभिधर्मकोशेऽभिहितम् । "मृत्यूपपत्तिभवयोरन्तरा भवतीहयः" ॥३॥१०॥ इत्यनेनान्तराभवशरीरं मत्त्वा तस्य च व्रीहिसन्तानसाधर्म्यादविच्छिन्नभवोद्भवरूपेण परिकल्पनमिति (अभिधर्मकोशः ३॥११॥) अयं च भवोद्भवः ज्ञानसन्ततिरूपः अस्याश्च सन्ततेः आद्यक्षणसंबन्ध एव जन्म । ज्ञानातिरिक्तस्यानभ्युपगमात् । तथा चोक्तम्—

"योगाचारमते तु सन्तिमतयस्तासां विवर्तोऽखिलः" । अन्यथा योगा-चारमतभङ्गापत्तेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् मते जन्मवदिदमन्तराभवशरीरं स्वच्छतया कर्मसामर्थ्यात् उत्पन्नं योगिमात्रगम्यं स्वप्नवन्नोपलभ्यत इति नैतावता तदभावः परिकल्पनीयः। अर्थक्रियाकारितायास्तत्र सत्त्वात् मिथ्या स्वप्नशरीरमिति वक्तुं न शक्यते। तथा च नैयायिक इव बौद्धाचार्योऽपि पुनर्जन्माङ्गीकरोति। तस्य च कारणं तृष्णां विपर्यस्तां बुद्धिं च मनुते। एतदभावे च नैरात्म्यदर्शनेन मुक्तिर्निर्वाणं वा भवति। एतदेव स्फुटयति धर्मकीर्ति :—

अनन्यसत्त्वनेयस्य हीनस्थानपरिग्रहः।
आत्मस्नेहवतो दुःखसुखत्यागाप्तिवाञ्छया ॥१।८२॥

ईश्वरप्रतिषेधेन स्वतन्त्रस्य पञ्चस्कन्धात्मकस्य सत्त्वस्य हीनस्थानपरिग्रहः गर्भवासः सतृष्णस्यैवजायते। अतएव तृष्णा गर्भवासस्य कारणम् सा च विपर्यस्त बुद्धिरूपा अतएव दुःखे सुखं सुखे च दुःखमिति मन्यते दुःखहानाय सुखावाप्तये च गर्भवासं करोति। अविद्या तृष्णा च यदि न स्याताम् जगति कस्यापि जन्म न भवेत्—दुःखे विपर्यासमतिः तृष्णा चाबन्धकारणम्।

जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति ॥१॥८३॥ इति

तस्मादस्मिन् मते छिन्ने मूले नैव पत्रं न शाखेति लौकिकन्यायमवलम्ब्य स्वशास्त्रप्रथितमुन्मूलितात्मग्रहं नैरात्म्यदर्शनं निर्वाणायकल्पते। तथाहि—नैरात्म्यदर्शनेनात्मनि आत्मीये वा न भवति स्नेहः न चास्निग्धस्योपजायते तृष्णा यया जन्म भवेदिति न दुःखं संसारिणां स्कन्धा नाम। तथा च दुःखस्य हेतुं तन्निरोधकं च नैरात्म्यदर्शनं प्रथममागमादुपश्रूयते। पश्चादनुमानेन निश्चीयते। अनेकशः बहुभिरुपायैर्बहुना कालेन चाभ्यस्यमानेन उपलभ्यते। तथा च—"श्रोतव्यः

श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः"।
मत्वा च सततं ध्येय एते दर्शनहेतव" ॥

इति सनातनधर्म्मावालम्बिभिः निर्णीतस्य मार्गस्यैवानुसरणं बौद्धा अपि कुर्वन्तीह। केवलं श्रुतिवाक्यस्य स्थाने स्वशास्त्रवाक्यमभिप्रयन्ति। तथा चात्र धर्मकीर्ति :—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुर्विरोधि नैरात्म्यदर्शनं तस्य बाधकम् ।
बहुशो बहुधोपायं कालेन बहुनास्य च ॥१।१३८।

दुःखहेतौ दोषं तद्विपक्षे नैरात्म्यदर्शने च गुणं प्रकाशयति अभ्यासस्तत्-संपन्नस्य सविधे अतएवाभ्यासाद् बुद्धेश्च पाटवात् आत्मग्रहस्य कारणं तृष्णा प्रहीयते—गच्छन्त्यभ्यस्यतस्तत्र गुणदोषाः प्रकाशताम् ।

बुद्धेश्च पाटवाद्धेतोर्वासनातः प्रहीयते ॥१।१३९॥

नैरात्म्यभावनासात्म्ये तु साक्षादेवात्मदर्शनं निवर्तते । ततश्च जन्माभावः मोक्षनगरगमनं च । अयंभावः—आत्मदर्शने सति तदपकारिणि रागः तदुपकारिणि द्वेषश्च जायेते । आत्माभावे तु तावुभौ न स्याताम् । मोहस्तु आत्मदर्शनमेव । तत् सर्वस्य वीजमात्मदर्शनमेव यदि नास्ति कुतस्तत्प्रभवाणां रागदीनां जन्मेति ! इयं हि कथा धर्मकीर्तिना स्फुटमुच्यते—

"आत्मदर्शनवीजस्य हानादपुनरागमः ।
तद्भूतभिन्नात्मतया ऽशेषमक्लेशनिर्ज्वरम् ॥१।१४३॥

द्वितीयचरणार्थस्तु आत्मदर्शनतो दुःखवीजाद् यतो भिन्नं नैरात्म्यदर्शनमतः अशेषमर्थात् सर्वमक्लेशमिति । कार्यवैगुण्यमचापलेउत्प्लुत्य गमनम्, वाग्वैगुण्यं मानाभावे ऽपि वृषलीवादादि बुद्धिवैगुण्यं तु नित्यासमाधानादव्याकृतचित्तावस्थानमेतत्त्रयं शेषं सकलक्लेशोपक्लेशप्रशमादक्लेशम् । निर्ज्वरंचादोषमूलत्वात् इति सर्वमभ्यासात् सिद्धयति ।

—:०:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-साहित्यस्यसूक्ष्मता

[प्राध्या० जीवनाथ झा
याज्ञ० लक्ष्मी० संस्कृत महाविद्यालये, मटिहानो स्थाने]

अपारपारावारस्य तलप्रवेशे सत्येव तदीयानन्यसाधारणविविधरत्नानि समुन्नीयन्ते, समुत्खाताया वसुधाया एव सु गोपितारोपिता विचित्रसरणयो मणयो नयनगोचरतामुपयान्ति, समुन्मोचितान्येव च त्वगनुबद्धानि—नारिकेलफलानि रसमुद्गिरन्ति।

साहित्यसुधासागरान्तर्विलसित-ध्वनिपीयूषमपि न जातु गम्भीरतलप्रवेशमन्तरा निर्गमयितुं शक्नुयात् कश्चिद् विपश्चित्।

सहृदयकृत्यमदो यद् रत्नपरिचयविदां नेत्रभूतां शुद्धरत्नसयत्नग्रहणमिव नूनमन्यूनमसाधारणमसुलभञ्च काव्यमर्म जिज्ञासमानानां जनानां पुर उपस्थाप्यम्। परम-प्राचीनतया, रससिद्धाऽनेक-प्रसिद्ध-ज्ञानवृद्ध सूक्ष्मशेमुषीक-महाकविजनतया प्रचारिता संस्कृतसाहित्ये दृष्टिपथमवतरन्ती परमसूक्ष्मेक्षिका न केवलं संस्कृतसाहित्यमपितु विविधप्रतिभा-रतं भारतमपि निरवशेषं विशेषयति।

सैवेदानीमग्रतोऽसमग्रतो महतां सहृदयसदयपाठकानां समुपहारीक्रियते निम्नलघुलेखेन—

भयङ्करे समरे लोकरावणं रावणं हत्त्वा दत्त्वा च विभीषणाय निर्णीतं स्फीतं प्राज्यं राज्यं पुष्पकविमानमारुह्य समुपवेश्य च स्नेहानीतां सीतां स्वसमीपे लक्ष्मणहनुमदादिभिः सह तदानीं निजराजधानीं प्रस्थितः स्थितधीर्गुणाभिरामः श्रीरामः सकौतुकं तत्तत्स्थानं सकर्मोपादानं सतीसीमन्तिनीं दर्शयति—

(१)

अत्राऽऽसोत् फणिपाशबन्धनविधिः शक्त्याभवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राऽऽहृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिग्धैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाऽप्यत्र मृगाक्षि ! राक्षसपतेः कृत्ता च कण्ठाटवी ॥

[का० प्र०]

अत्र अर्थशक्तिमूलं संलक्ष्यक्रमं रामरूपं व्यङ्ग्यं कीदृशं चम्मकारि ? कीदृक् च धीरोदात्तताया अगर्वत्वप्रकाशनौचित्यम् ? कीदृशी च स्वनामगोपनकृता चारुतेति न परोक्षं प्रेक्षावताम् वाच्यार्थाऽपेक्षया हि व्यङ्ग्यार्थस्य प्राधान्ये सत्येव उत्तमं काव्यं मन्यते सर्वैरालङ्कारिकैः; अतएवात्र उत्तमकाव्यतया भवितव्यम् । परन्तु साहित्यामलनिकषोपलेघर्षयता परमसूक्ष्मग्राहिणा समालोचकप्रवरेण आचार्यमम्मटेन—अनिर्धारितविशेषत्वेन किमः शक्तौ सत्यामपि, अत्र मया रामेणेतिपदं [?]प्रसिद्धिवशाद् वाच्यायमानं सत् अगूढमेव व्यङ्ग्यमिति पद्यमिदं मध्यमकाव्यप्रभेदरूपमगूढाख्यगुणीभूतव्यङ्ग्यनामकं न तु गूढव्यङ्ग्यमुत्तमं काव्यमिति समालोचितं काव्यप्रकाशे । प्रकाशितञ्च तस्याऽप्यत्रेति पाठे तस्य—त्रिभुवनविजयित्वेन प्रसिद्धस्य रावणस्येत्यर्थे मयेति व्यङ्ग्यार्थो वस्तुतो गोपिततया महाऽऽकारं चमत्कारं चारु सूचयेत् विचारसरणिरेषा कीदृशीं सूक्ष्मेक्षिकां द्योतयतीति कथनेनालम् ।

(२)

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालङ्काभर्तुर्वदनपरिपाटीषुघटना
मयाप्तं रामत्वं कुशलवसुता नत्वधिगता ॥

पद्यमिदं शब्दशक्तिमूलाऽनुरणरूपोपमालङ्कारस्य संलक्ष्यक्रमव्यङ्ग्यस्य वाच्याङ्गतायामितराङ्गव्यङ्ग्ययस्योदाहरणप्रकरणे साहित्यदर्पणादौ प्रदर्शितमस्ति—

कश्चिद् दरिद्रो धनार्थमुद्योगं विदधदपि धनमलभमानः स्वनिर्वेदोक्तिं प्रकटयति कनकस्य—सुवर्णस्य मृगे—अन्वेषणे तृष्णया—निष्फलाशया अथ वा कनके या मृगतृष्णा—मरीचिका तया अन्धिता—विवेकरहिता धीः—बुद्धिर्यस्य तादृशेन मया—दरिद्रेण जनस्थाने—धनिजनग्रामादौ भ्रान्तम्—भ्रमणं कृतम् । पक्षे कनकमृगे मारीचे या तृष्णा—प्राप्त्यभिलाषः तया अन्धिता धीर्यस्य तेन रामेण जनस्थाने—तन्नाम्नि दण्डकारण्यप्रदेशे भ्रान्तम् । वै—निश्चयेन प्रतिपदं प्रतिधनिस्थानं देहि—भिक्षां प्रयच्छ इति वच—वाक्यम् उदश्रु—उद्गतम् अश्रु नेत्र-

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलं यस्मिन् कर्मणि तद् यथास्यात् तथा प्रलपितं—व्यर्थमेवोक्तम् धनाऽलाभात्। पक्षे प्रतिपदं प्रत्येकपादन्यासे वैदहि !—सीते ! इति वचः उदश्रु यथा स्यात् तथा प्रलपितम्—निरर्थकमेवोक्तम् रावणहृतायाः सीतायास्तदानीं प्राप्तेरभावात्। काभर्तुः—कुत्सितधनिकस्य परिपाटीषु मिथ्याभाषणप्रकारेषु घटना—उपपत्तिः अलम्—अत्यन्तं न कृता ?—न विहिता ? इति वद—कथय अपितु सर्वैव कृता अर्थात् धनिप्रसन्नतार्थं सर्वविधैवोक्तिरनुचितापि रचितैव मया तथापि ततो धनं नैव लब्धम्। पक्षे लङ्काभर्तुः—रावणस्य वदनपरिपाट्यां—मुखपङ्क्तौ इषुघटना—वाणसंयोजना कृता अत एव मया रामत्वं—रामधर्मः आप्तम्—लब्धम् उपरिनिर्दिष्टकार्याणि रामेणेव मयापि कृतानि तु—किन्तु मया कुशलवप्रसूता—कुशलं—कल्याणप्रदं वसु—धनं यस्य तस्य भावः कुशलवसुता न अधिगता नैव लब्धा कृतविविधक्लेशोऽप्यहं धनं नैव लब्धुमशकम् रामेण तु कुशलवौ सुतौ यस्याः सा सीता युद्धान्तरं प्राप्तेत्यर्थः।

अत्र भट्टवाचस्पपतिकविना महता कौशलेन दरिद्रामयोः साम्यं प्रदर्श्य दरिद्रस्य असाफल्यं कल्पितम् यत्र सभङ्गाऽभङ्गश्लेषविशेषयोजनापि कलाकौशलाधिक्यं प्रकटयति। काव्यमिदं न केवलमुत्तमं भाति किन्तु उत्तमोत्तमवद् विद्योतते तथापि सूक्ष्मसमालोचनानिकषोपलसंघर्षणं न तथा प्रमाणयति यतो रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तिमहिम्नैव रामत्वमवगम्यते वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्वता तद्गोपनमपाकृतं तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतया अङ्गतां नीतम् अतो वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य चमत्कारित्वाभावात् मध्यमकाव्यमेव गुणीभूतव्यङ्ग्याख्यं पद्यमिदमिति स्थिरीकृतं विश्वनाथकविराजेन आचार्यमम्मटमतानुसारम्, नत्वस्योत्तमकाव्यत्वमिति। एतादृशी सूक्ष्मेक्षिका क्वान्यत्र प्राप्येत ऋते संस्कृतकाव्यात्।

रसगङ्गाधररीत्या काव्यं चतुर्विधम् उत्तमोत्तमम्, उत्तमम्, मध्यमम्, अधमञ्चेति तत्रोत्तमोत्तमकाव्यस्य उत्तमाख्यकाव्येन सह या भेदसूक्ष्मता पण्डितराजस्य दृष्टिपथे प्रादुरभूत् सा सहृदयसंवेद्येव विद्यते परमसूक्ष्मत्वात्।

शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहोमनोरथान्।
दयिता दयिताऽऽननाम्बुजं दरमीलन्नयना निरीक्षते॥

स्वामिसमीपे सुप्तापि नवोढा मनोरथान्—नानाक्रीडाविषयाऽभिलाषान् सफलीकर्तुं—चरितार्थयितुम् अनीश्वरा—लज्जादिना असमर्था दयिता—प्रेयसी नायिका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

दरमीलन्नयना —दरम्—ईषत् मीलती—त्रपौत्सुक्यवशात् सङ्कुचती नयने यस्याः तादृशी सती दयितस्य—प्रियस्य आननाम्बुजं—मुखकमलं निरीक्षते—पश्यति न तु चुम्बितुमालिङ्गितुमाघ्रातुं वोपक्रमते ।

अत्रालम्बनस्य नायकस्य सविधशयनाऽऽक्षिप्तस्य रहस्स्थानादेरुद्दीपनस्य च विभावस्य, तादृशनिरीक्षणादेरनुभावस्य, त्रपौत्सुक्यादेश्च व्यभिचारिणः संयोगाद् रतिरभिव्यज्यते । इदञ्च पद्यम्—

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः, काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥

इति ध्वन्यालोकप्रतिपादितध्वनिनामककाव्यमेव पण्डिराजोक्तमुत्तमोत्तमं काव्यं वर्तते । अत्र चुम्बनादेस्त्रपायाश्च नैव प्राधान्येन व्यङ्ग्यत्वम् कथमपि वाच्यवृत्यनालिङ्गितस्यैव हि व्यङ्ग्यस्य चमत्कारित्वेन आलङ्कारिकैः स्वीकारात् तस्मादत्र व्यङ्ग्यार्थस्याऽधिकचमत्कारित्वेन उत्तमोत्तमकाव्यत्वमेवेति पण्डितराजस्य परमसूक्ष्मसरणिः स्मरणीया ।

ध्वनिभेदप्रभेदादिगणनायां तदवान्तरवैसादृश्यप्रयोकसूक्ष्मतत्त्वाकलनमपि संस्कृतसाहित्यसेविबुधवर्गस्य सूक्ष्मेक्षिकावत्त्वं प्रमाणयति । इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोक्ष एव परम-पुरुषार्थः ।

[ले० प० श्री विश्वम्भर झा; रमेश्वरलता सं० म० विद्यालयः, दरभंगा]

'एकोऽहं बहु स्यां प्रजायेय' इत्युपनिषदि निर्दिष्टामिच्छाशक्तिमविद्याख्यां जगद्रूपेण परिणमय्य तस्मिन् स्वयमपि प्रविष्टस्य ब्रह्मणः प्रतिबिम्बभूता बहवो जीवा इह सञ्चरन्ति, संसरन्ति वा। सन्ति च वेदान्तिभ्योऽन्ये दार्शनिका आत्मबहुत्ववादिनः, केचन वेदान्तिनोऽपि बद्धमुक्तव्यवस्थाया आञ्जस्येनोपपत्तये जीवानां बहुत्वं मन्यन्त एव। अतोऽत्र बहुत्वेनैव व्यवहरिष्यामि।

ते चेमे वयं जीवा अनादावस्मिन् जन्ममरणप्रवाहे पतिताः कष्टपरम्परामनुभवन्तः प्रत्यहमितः समुद्धारं वाञ्छामो नान्यत् किञ्चित्। किन्तु वयं न जानीमो यत् किमिच्छाम इति। एतत् किं? कयाचिदिच्छयैव सततं चेष्टामहे इत्यपि न गोचरीकुर्मः।

यत्नेनेच्छानुमानम्।

वयं जन्मत एव नहि, ततोऽपि पूर्वत एव मातुरुदरे स्थितेरारभ्य यावज्जीवं जाग्रत्स्वप्नसुषुप्तिषु सर्वास्वेवावस्थासु सर्वदा सर्वेन्द्रियेषु केनचिदपीन्द्रियेण मनसा च चेष्टामह एव। तदुक्तं भगवद्गीतासु—

"नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्
कार्यतेह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥"

कदाचित् किमपि चिन्तयामः, किमपि शृणुमः, किमपि वदामः, किमपि पश्यामः, किञ्चिद्रसयामोऽथ किमपि स्पृशामः, अन्ततः श्वसिमस्तु सर्वदा। श्वासोच्छ्वासोऽपि क्रियैव प्राणधारणानुकूला, तदनुमापिका च। इय च निरवच्छिन्नप्रवृत्ता क्रिया तत्कारणभूतामिच्छामनुमापयति 'नानिच्छन् करोती' ति हि दार्शनिकानां सिद्धान्तः। क्रिया हि सप्रयोजनाऽत एव चाभाणकोऽयम् "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते" इति। यदुद्दिश्य प्रवर्त्तते तदेव च प्रयोजनम्। तथा च किमपि प्रयोजनमिच्छन्त एव सर्वास्वेव क्रियासु प्रवर्तामहे इति निश्चितम्। निष्प्रयोजने प्रतीयमाने जलताडनादावपि किञ्चिदन्तर्हितं मनोविनोदादि प्रयोजनं भवत्येव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इच्छाविषयस्याज्ञानम् ।

यद्यपि 'जानाति-इच्छति-यतते' इति निर्धारितप्रक्रियया इच्छां प्रति ज्ञानस्य कारणत्वमिति 'वयं किमिच्छाम' इति इच्छाविषयविषयकः सन्देहोऽपि न युक्तः, इच्छाविषयस्येच्छातः पूर्वमेव ज्ञातत्वौचित्यात् तथापि इच्छाविषयज्ञानस्थानुद्भूतत्वे युज्यतएवायं सन्देहः । भवतिह्येवम् अनेकस्मिन् समये वयं किमपीच्छाम इति तु प्रतिभाति किन्तु किमिच्छाम इति नावधार्यते । इमामेवास्फुटामिच्छामधिकृत्य कविकुलगुरुणा कालिदासेनेत्थमुक्तम्—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वम्
भावस्थिराणि जननान्तरसौहृदानि ॥" इति ।

एवं विषयस्यानुद्भूतत्वे स्मृतिरिव इच्छापि विविच्याज्ञातविषयिणी सम्भवत्येवेति भवति तद्विषये सन्देहः इत्यात्मनोऽपि इच्छाया विषयस्य विशदरूप ज्ञातुं परं प्रति प्रकटयितुं वाऽशक्यत्वं भवति । परमार्थतस्तदिच्छा-विषयस्य ज्ञाने हि सर्वे एव तत्प्राप्त्युपायान्वेषणप्रवृत्ता भवेयुरिति न कोऽप्युन्मार्गगः स्यात्, परन्तु सर्वे वयमुन्मार्गगा एव परिलक्ष्यामहे । यथा बाला अजातवाक्शक्तयः वयमिव सर्वान् शरीरादिसम्बन्धिनो विषयानिच्छन्ति, परन्तु प्रकटयितुं न शक्नुवन्ति । तथा वयमपि यस्य पारमार्थिकस्य वस्तुनः कृते सर्वाः क्रिया आचरामः, तदिह कथयितुं न शक्नुम इति किं चित्रम् । स्वेच्छाविषयं वस्तुतोऽज्ञात्वैव भ्रान्त्या कमपि तद्विषयं परिकल्प्य प्रवर्त्तामहे, तद्विषयप्राप्त्या च क्षणिकां भ्रान्तामेव प्रीतिमपि विन्दामः । वस्तुतो न साऽस्माकमिच्छा, नैव च ते विषया इष्टाः ।

इच्छाविषयस्यावधारणोपक्रमः ।

बालान् रुदत उपलभ्य माता परिकल्पयति-अस्य स्तन्यपानेच्छेति, स्तन्यदाने कृतेऽपि रोदनानिवृत्तौ क्वचिदस्य पीडेति तर्क्यते । क्व पीडेति निश्चयाय च तत्तदङ्गानि क्रमशः स्पृष्ट्वा यत्र स्पर्शे कृते रोदनाधिक्यं तत्रैव पीडेति परिलक्षयति, तत्प्रतीकारं च कुरुते । एवमन्यानपि बालाभिलाषविषयांस्तदङ्गचेष्टाभिरेवावधारयति, तत्र संवादं च लभते । तथैवाकारणकरुणावत्या श्रुत्या माता तदनुगतया स्मृत्याच धात्र्येव, तदनुचरैश्च पुराणादिभिः, दुर्बोधानामस्माकं बालानामिव, इच्छाविषयस्यावधारणमस्माकं चेष्टाः परिलक्ष्येव कृतमिति प्रतिभाति । ते च विषयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थूलतया तैः धर्मार्थकाममोक्षाख्यानेन प्रख्यापिताः। अत एव च पुरुषार्थतया व्यवह्रियन्ते-पुरि शरीरे वसताम् ओषतां (जाग्रतां) वा आत्मनामर्थनाविषयत्वेन भासमानत्वात्।

एतदवधारणस्य मूलम्

वयमहिंसासत्याक्रोधादीन् परैरात्मनः कृते क्रियमाणान् प्रकृत्यैव बहुमन्यामहे आत्मना च परेषां कृते तेषां कर्तव्यत्वमवधारयामः, तदर्थञ्च यतामहे। आत्मनश्च परिमितां शक्तिमवलोक्यापरिमितशक्तेः कस्यचनाराधनेनतं स्वानुकूलीकर्त्तुमपि प्रवर्त्तामहे। कुर्मश्च तदर्थं बहुव्ययायाससाध्याः यागादिकाः क्रियाः। एवं-विधाश्च विषया धर्मत्वेन परिभाषिताः शास्त्रेषु। अतोऽस्माकमेवंभूतासु क्रियासु प्रवर्तिकायाः इच्छाया विषयोधर्म इति तु निश्चितम्। एवमर्थलाभायापि कृष्यादि-बहुविधकार्येषु प्रवृत्तिमुपलभ्य तैरर्थोपि पुरुषस्येच्छाविषयत्वेनावधारितः।

इष्टगन्धस्पर्शरूपरसादीनिन्द्रियार्थानाप्तुकामैरपि जनैः कष्टसाध्यानि कार्याणि क्रियमाणानि दृष्ट्वा तत्प्राप्तौ च कृतार्थतामिव परिलक्ष्य, तेषां वर्गीकरणकारणरूपान्तरानुपलब्धेः काम्यमानतामूलक 'काम' इति नाम धृतम्। सोऽपि चास्माकं पूर्वकथितप्रवृत्तिप्रयोजनतया लक्षितः पुरुषार्थकोटौ गणितः। एवं चायं समूहस्त्रिवर्गनाम्ना ख्यातः।

चतुर्थपुरुषार्थावधारणकारणम्।

एतैः धर्मार्थकामैः सर्वैरुपलब्धैरपि इच्छायाः शान्त्यभावेन अतोऽन्यदेव किञ्चिदेतेऽभिलषन्तीति विनिश्चित्य तुरीयं पारमार्थिकं मोक्षनामानं पुरुषार्थं निरूपयन्। युक्तं चैतत्, तदेव हि क्रियाया उद्देश्यतया मन्तव्यं यस्म प्राप्तौ सत्यां क्रियाया विरामः स्यात्। किन्तु कृत्वाऽपि बहुविधानि सुकृतानि, अनुष्ठायाऽपि बहुव्ययायाससाध्यान् यागादीन्, तप्त्वा च बहुविधानि तपांसि, गत्वाऽपि चानेकानि तीर्थानि नास्माकमियं सततप्रवर्तमाना क्रियाशीलता विश्राम्यति, इति एतैरनुष्ठितैर्न वास्तविकीच्छापूर्तिरित्यनुमीयते। ननु न केवलं क्रियासम्पादनेनेच्छा शान्तिरपि तु तत्फलप्राप्त्येति चेत्सत्यम्, तत्फलस्य स्वर्गादेः प्राप्तावपि देवादयः क्रियाशीला अनिवृत्ताश्च तिष्ठन्तीति प्रामाणिकागम-प्रसिद्धत्वात्। अस्ति च तत्राप्युच्चावचपदवैषम्य-दानवाक्रमणादिकृतापादेः श्रवणम्। उक्तं च सांख्यकारिकासु—

'दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयातिशययुक्तः।' इति अतस्ततत्फलप्राप्तावपि ततोऽधिकतरस्येच्छैव पूर्वामिच्छामपारमार्थिकीं ख्यापयति। एवं च धर्मो नास्माकं सततप्रवृत्तेः प्रयोजनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमर्थोऽपि परीक्ष्यताम्। अर्थप्राप्तौ निवृत्तिरायास्यतीति गतानुगतिकमवलम्ब्य वयं तदुपार्जने तद्रक्षणेच कृष्यादौ शतीवातातपान् सहामहे, असेव्यान् सेवामहे, अयाज्यान् याजयामहे, अकृत्यमप्याचरामः, उदधीनपि लङ्घयामः पितॄनपि च्छलयामः भ्रातॄनपि जिघांसामः। परमेक्षिरुपायै रुपायैर्वा लब्धैरपि धनैः केनाम निर्वृता दृष्टाः। प्रत्युत यथायथा धन वर्धते तथातथा तदूषूमणा तेऽन्तरेवदह्यमाना इव लक्ष्यन्ते नितान्त मशान्तस्वान्ताः। उक्तं च केनचित्--

अर्थानामर्जने दुःखं तथैव परिपालने।
नाशे दुःखं व्यये दुःखं धिगर्थान क्लेशकारिणः॥ इति

अथ विचार्यतां कामानां काम्यत्वम्। स एव काम्यो यस्य प्राप्तौ कामना शाम्यति। काम्यत्वेन ख्यातेषु विषयेषु प्रत्येकं, सर्वेषु वायश्चारुचि प्राप्तेष्वपि किमिच्छा निवृत्तिर्दृष्टा क्वापि। नहि प्रत्युत वर्धमानैव दृश्यते। उक्तं च भगवता--

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥ इति।

अतश्चैषामिच्छाविषयत्वेनावधारण न पारमार्थिकी, किन्तु मुख्येच्छाविषयाच्छादकतया, तत्सभाभासतया, तदवगतिसोपानतया वा जायमाना अवान्तरेच्छाविषयतैव। यथाऽऽमज्वरपीड़ितो मनुजः कदाचित्स्नानमिच्छति, कदाचिच्च सुमधुरान्नपानादिकमिच्छति, किन्तु न सा तस्य वास्तविकीच्छाऽपितु ज्वरदोषकृतैव। वर्जयन्ति तद्विषयान् वैद्याः। कदाचिद्वैद्यपरिचारकाद्यवहेलया सेविते च स्वेच्छानुकूलविषये विषमैव परिणतिः सम्पद्यते। एवं वयमपि संसारज्वरपीड़िताः यान्यान् वाञ्छामहे न ते वस्तुतो वाञ्छनीयाः, लब्धाश्चानर्थकारकाएवेति निश्चेमः। अतएव च वर्षाणां सहस्राणि यावत कामोपभोगैरतिवाह्यान्ते ययातिनृपेणोक्तम्--

"यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्याप्तमिति मत्वा शमं व्रजेत॥ इति।

परिशेषान्मोक्षएवेच्छाविषयः।

एवं पूर्वोक्तयुक्तया त्रिवर्गस्यावाञ्छनीयत्वे निर्णीते मोक्षएवास्माकमिच्छाविषयत्वेनार्थनीयः स एव च परमः पुरुषार्थ इति पर्यवस्यति। तस्य कथमिच्छाविषयतेति प्रदर्शयिषयतेऽथे तत्स्वरूपनिरूपणपुरःसरमिति विरमामः। शान्तिः, शान्तिः, शान्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीयं व्याकरणम्, तस्य वैशिष्ट्यञ्च

लेखक :—श्रीवर्द्धन ठाकुर 'रिसर्चस्कालर,
मिथिलाशोधसंस्थान, महेशनगर, दरभंगा।

व्याकरणस्य स्वरूपम्

व्याङ्पूर्वकात् कृञ्धातोः करणे ल्युटि निष्पन्नस्य व्याकरणशब्दस्य प्रकृतिप्रत्ययविभागकल्पनया साधुशब्दनिर्वचनं मुख्यार्थः। शब्दानां नित्यत्वेनाविचालितया प्रकृतिप्रत्ययविभागः नात्यन्तं सत्यतामर्हतीति कल्पनेत्युच्यते। न चैवं छन्दोवत्सूत्रात्मकपाणिन्युपज्ञमहाशास्त्रस्य कपोलकल्पितत्वापतिः? अइउणादिचतुर्दशसूत्रीभाष्यरूपस्यास्यापि अनादिमूलकमनादिरेवेति नियमादनादित्वात्। माहेश्वराणीत्यस्य महेश्वरादागतानीत्येव विवरणात्। अत एव छन्दोवत्सूत्राणि भवन्तीति तत्र तत्र भाष्यकृतामुक्तिः संगच्छते। अत एव च लाघवार्थं सूत्रविचाले पारायणादावदृष्टहानिरुक्ता नागेशेन।

सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके इत्यभियुक्तोक्तिवत् पाणिनीयसूत्राणामपि वेदात्मकचतुर्दशसूत्रान्तर्गतत्वमेव। एवञ्च बीजाद्वृक्षो वृक्षाद्बीजमितिवत् पाणिनीयस्य व्याकरणस्यानादित्वं स्थितम्। कल्पनोक्तिश्च तस्य तपोबलात् पाणिनिप्रकाशितत्वादेव। वेदव्याख्यानरूपेतिहासपुराणादीनां व्यासकृतत्वव्यवहारवत्।

व्याकरणाध्ययनस्य आवश्यकत्वम्,

अथापभ्रंशभाषावत् संस्कृतभाषायाअपि ग्रन्थाध्ययनाध्यापनादिव्यवहारादेव बोधसिद्धौ किमर्थं बहुकालश्रमसाध्यं शास्त्राध्ययनं कार्यमिति चेन्नियामकशास्त्रं विना नियम्यविषयाणां यादृच्छिकत्वापत्तौ गावी गोणीत्यादिवत् अपभ्रंशत्वा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पातस्यापि सम्भावनात्। सैषाव्याकरणस्य महतीसहायता यया अनादिकालादद्या-वधि संस्कृतावाक्स्वरूपान्न च्यवतइति।

संस्कृतगिरोऽपशब्दमयत्वे न केवलं यज्ञादौ धर्महानिरेवापि तु नियतैक-भाषया पृथिवीस्थसर्वलोकानां यः परस्परं वाक्सम्बन्धः प्रचलति स व्याहन्येत, व्यव-हारलोपश्च प्रसज्येत। नियतभाषासत्वे तु अतिप्राचीनकालप्रणीतास्त्वेते व्यवहार-धर्मग्रन्था अद्यापि पूर्ववत् पठ्यन्ते वुद्ध्यन्ते च। तत्तद्द्वीपवासिनामन्योऽन्यं सर्वविधव्यवहारोऽपि सञ्जायते। शास्त्रसत्त्वेऽपि तदननुरोधात् अपभ्रंशा उत्प-द्यन्ते इतित्वन्यदेतत्। धर्मशास्त्रसत्वेऽपि तदनादरादकार्यवत्।

सृष्ट्यादौ एका संस्कृतवागेव आसीत्। क्रमेण नानाकारणेभ्यः अपभ्रं-शानामुत्पत्तिरित्येष विदुषां सिद्धान्तः। तत्र च दैवी वाग्व्यवकीर्णेयमशक्तैरभि-धातृभिरित्यादृयभियुक्तवचनानि प्रमाणानि। अपि च पाणिनीयव्याकरणस्य सम्य-गभ्याससत्वे सर्वाणिशास्त्राणि किं पुनर्वेदा अपि पदपदार्थज्ञानात् करतलगता इव दृश्यन्ते। किमन्यत्? व्याकरणमनधीत्य शास्त्रान्तरीयश्रवणेऽधिकारी अपि न भवति। तथा च—

"यो वेदवेदवदनं सदनं हि सम्यग्ब्राह्मयाःस वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्, शास्त्रान्तरेषु भवतिश्रवणेऽधिकारी॥"

इति भास्कराचार्य ऊचिवान्। स्वस्मिँश्चाष्टानां व्याकरणानां ज्ञानमुक्तवान्। श्रव-णेऽधिकारी इत्यस्य द्विविधाव्याख्या आचार्यस्याभिप्रेता। श्रवणेऽध्ययनेऽधिकारी इत्येका, श्रवणमात्रेऽधिकारी इत्यपरा। अर्थाद्वैयाकरणामां शास्त्रान्तराध्ययनं गुरूमुखात् श्रवणमात्रमावश्यकं तत्तच्छास्त्रशैलीज्ञानाय, न ममनादिश्रमोऽपेक्षित इति एतत्सर्वमभिप्रेत्यैव भाष्ये वहुविधप्रयोजनसद्भावेऽपि भाष्यकारः व्याकरणस्य साक्षात्प्रयोजनमाह अथशब्दानुशासनमित्ययुक्तवान् कैयटः। साक्षात्प्रयोजनमि-त्यस्य मुख्यं प्रयोजनमित्यर्थः। शब्दज्ञानं प्रयोजनम्। अन्यानिरक्षोहादीनि शब्द-ज्ञानरूपमुख्यप्रयोजनस्य प्रयोजनानीत्युक्तवान्। एष एव चाभिप्रायः शास्त्रपूर्वके प्रयोगेऽभ्युदय इत्युक्तवतो वार्तिककृतोऽपि। अन्यथा शास्त्रपूर्वके प्रयोगेऽभ्युदय-स्य लौकिकप्रमाणनिरपेक्षत्वेनापामरजनानामनादरणीयत्वप्रसंग इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(वैशिष्ट्यम्)

यद्यपि चान्द्रादीन्यष्टौ व्याकरणानि स्मर्यन्ते प्रयोगसाधनत्वमपि तेषामसमानसौन्दर्यमावहति तथापि तेषु पाणिनीयं व्याकरणमेव मूर्द्धन्यतममिति सर्वेषां निर्बाधं मतम्। तथा हि पाणिनीयेऽस्मिन् व्याकरणे सर्वत्र दार्शनिकी व्यवस्थाऽनुसृता। मीमांसायास्तु सकलैव रीतिरत्र प्रचलति। विकल्पस्थाने विकल्पसूत्रम्, वाक्यभेदस्थाने सूत्रभेदप्रसङ्गः। विधिनियमपरिसंख्यादिशास्त्राणि, पदैकवाक्यता, वाक्यैकवाक्यता, अर्थैकवाक्यतेत्येकवाक्यतात्रयम् संज्ञापरिभाषाशास्त्राणां विधिशास्त्रैरित्यादि सर्वो [illegible]र्यः मीमांसारीतिमनुसरति। प्रकृतिप्रत्ययार्थनिर्णये चानुभवनिरपेक्षं दर्शनान्तरीयमतमाक्षिप्य स्वतन्त्रमनुभवसाक्षिकमर्थमादत्ते। किं बहुना, प्रकृतिप्रत्ययविचारात्मकमहाशास्त्रस्य स्फोटात्मकशब्दब्रह्मपरिचायकत्वेन दर्शनान्तरमिव ब्रह्मज्ञानोद्देश्यकमिदं सर्वथा दर्शनतामुपलभमानं स्तूयते शास्त्रज्ञैः।

उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनिस्थित्वा ततः सत्यं समीहते॥

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनं ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः, इति प्रोक्तं वाक्यपदीये भूषणे च। अपि च यावतः सूक्ष्मविचारग्रन्थान् व्याकरणेऽस्मिन्नुपलभामहे न तावतः कस्मिँश्चिद्दर्शनेऽपि किं पुनर्व्याकरणान्तरे। अत एव "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति संगिरन्ते ग्रन्थपरीक्षकाः। पाणिनीयस्यास्य व्याकरणान्तरेभ्यः अयमपि विशेषः यदत्र वैदिकशब्दानामपि साधनप्रक्रिया, स्वरसञ्चारप्रकारश्च महतोद्देशेन पठ्यमानवलोक्यते। नैवमन्यत्र। अत एव वेदशास्त्राङ्गत्वमस्यैव न्यायतो विद्यमानमुद्घोष्यते समदर्शिभिः युक्तञ्चैतत् योयमुपकुर्यात् स तस्याङ्गत्वमर्हतीति नियमात्। अन्यथा सर्वस्यैव सर्वाङ्गत्वापत्तेः।

अथान्योऽपि विशेषः पाणिनीये व्याकरणे। तत्र दीक्षितविरचितसिद्धान्तकौमुद्यामारोहणावरोहणक्रमयोर्मध्येऽवरोहणक्रममवलम्ब्य प्रकरणानि प्रणीतानि। तथा हि व्याकरणस्यचरमसिद्धान्तो वाक्यस्फोट एव, तदुपदेशाय सुदृध्युपास्य इत्यादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्यसाधनानि पञ्चसन्धिप्रकरणानि प्रथमतो दत्तानि ततः पदस्फोटमालम्ब्य पदसाधनानि अजन्तपुँल्लिङ्गादीनि प्रकरणानि उट्टङ्कितानि मध्ये, ततो वर्णस्फोटपरिचायकाः भ्वादिगणाः संसाधिताः शेषे । एवं वर्णपदवाक्यस्फोटानामवरोहणक्रममालम्ब्य समुद्भाविता सौकर्येण विद्यार्थिनां व्याकरणज्ञानमर्पयन्ती यथार्थनाम्नी कौमुदी विजयते संस्कृतवाङ्मये । अत एव-निःशेषं कौमुदीमात्रमेव व्याकरणम् । टीकाटीप्पण्यस्तदुपकारिकाः तथा च—

कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः ।
कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः ॥

इति वृद्धानां वचनं प्रवर्तते ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवोपरि ग्रहप्रभावः

(प० श्रीशिवकान्तझा ज्यो० रमेश्वरलतामहाविद्यालयः, दरभङ्गा)

यत्किञ्चिदपिकार्यं केनाऽपि कर्त्रैव निष्पन्नं भवतीति कार्यरूपस्य जगतः कालः कर्त्ता। अनाद्यनन्तोऽव्यक्तरूपः सनातनो व्यापकश्चायं भगवान् कालः सर्वप्रथमंतेजो रूपेणात्मानं प्रकटयति, स्वभावतः कृष्णरूपत्वात्। ततोऽहङ्कारस्तस्मादाकाशवाय्वग्नि जल-क्षितिरूपाणां पञ्चतन्मात्राणामाविर्भावः। एतेषां संहतेर्ब्रह्माण्डोदरवर्त्तिनः पाञ्चभौतिकाः सकलाः सूर्यादयोग्रहा नक्षत्राणि मनुष्यादयो जीवाश्च प्रभवन्ति। सर्वेऽपि सूक्ष्म-स्थूल भेदाद्द्विविधात्मकाः सन्ति, स्थूलरूपस्यैवाव्यक्तादाविर्भावात्। तथोक्तं भगवता श्रीकृष्णेन——

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
राज्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥

तत्र कालस्वरूपो विनाशरहितः प्राणी जीवसंज्ञकोऽर्थात् जीवति सर्वकालमिति जीवः, कालपुरुषसंज्ञकश्च।

धर्मोनित्यः सुखदुःखेत्वनित्ये,
जीवो नित्यो हेतुरस्य त्वनित्यः॥ इत्युक्तेः।

अथाऽकाशस्थेषु भूम्यादिपिण्डेषु भूसूर्यपिण्डौ महान्तौ, अन्ये च लघुरूपाः। तत्र सूर्यबिम्बस्य स्वभावतोऽतितीक्ष्णत्वादन्येषाम्भूम्यतिरिक्तानां लघुत्वाच्च भूबिम्बोपरि चराचरजीवानां वसतिरस्ति, भूम्यतिरिक्तेषु केष्वपि ग्रहबिम्बेषु नास्ति वसतिर्जीवानाम्। यथोक्तं भास्करेण——

भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षावृत्तैर्वृत्तो वृतः सन्मृदनिलसलिलव्योमतेजोमयोऽयम्। नान्याधारः स्वशक्त्यैव वियतिनियतं तिष्ठतीहास्यपृष्ठे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्ठं विश्वञ्चशश्वत् सदनुजमनुजादित्यदैत्यं समन्तात् ॥

सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः ।
कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव ॥

अर्थादाधारहीनः पाञ्चभौतिकोऽयं भूमेः पिण्डः स्वशक्त्येवाकाशेब्रह्माण्डोदरमध्येवर्तीवर्त्ति, अस्या उपरि समन्तात् दानव, मानव, देव, दैत्य, पर्वताराम, ग्रामादिसहितं विश्वं शश्वदस्ति । भूमेरुपरि चन्द्रादिविम्बानां स्थितिः । नहि तेषु मनुष्यादीनां निवासः । सर्वाणिविम्बानि भूविम्बसहितानिचलानि, परस्परमाकर्षणशक्तियुक्तानि सत्त्वादिगुणसहितानि च सन्ति । गृह्णात्यर्थादाकर्षणशक्त्या स्वाभिमुखमाकर्षति इति ग्रहः । आकर्षणशक्तियुक्ताः सूर्यादयो ग्रहा भूविम्बस्थजीवान् स्वापेक्षया लघुरूपान् स्वस्वशक्तिभिरपकर्षन्तो ऽर्थात् स्वकोय रूप-गुण-स्वभावादिभिस्तान् प्रपूरयन्ति । यथोक्तं वराहेण—

एते ग्रहा बलिष्ठाः प्रसूतिकाले स्वमूर्तिसमम् ।
कुर्युर्देहं नियतं बहवश्च समागता मिश्रम् ॥

अर्थात् ब्रह्माण्डोदरवर्त्तिनो ये चराचरजीवास्तेषु पञ्चमहाभूतानि त्रयोगुणा सप्तधातवश्च ग्रहनक्षत्रज्योतिःप्रभावादेवजायन्ते, क्वचित्पार्थिवांशोऽधिकः, क्वचिज्जलांशो विशेषः, क्वचिद्वह्न्यंशो महान् , क्वचिद्वायोरंशः, क्वचिदाकाशस्य भागः, एवञ्च क्वचित्सत्त्वग्रहप्रभावातिशयात्सत्वगुणाधिकत्वम् , क्वचिद्रजोग्रहप्रभावद्रजसोऽधिकत्वम् , क्वचित्तमोगुणप्राधान्यात्तमोगुणाधिकत्वम् ।

तथोक्तं वराहेण—

गुरुशशिरवयः सत्त्वंरजः सितज्ञौ तमोऽर्कसुतभौमौ ।
एतेऽन्तरात्मनः स्वां प्रकृतिं जन्तोः प्रयच्छन्ति ॥

तथा च क्वचिद्रविग्रहबलबाहुल्यात्पित्ताधिकत्वम् , कस्यचिच्चन्द्रवीर्याधिकत्वात्कफाधिकत्वम् , कस्यचिद्भौमसत्वाधिक्यात् रक्ताधिकत्वम् ।

एवं कस्यचिच्छरीरे मांसप्राचुर्यम् , कस्यचिदस्थिबाहुल्यम्, कस्यचित्के-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाधिकत्वम्, कश्चिद्दीर्घः, कश्चित्खर्वः, कचित्पङ्गुः, कश्चिच्चक्षुर्विकलः, कश्चिदन्धः काणोबधिरः, कचिद्दरिद्रः, कश्चिद्राजा, कश्चिन्मूर्खः, कचिद्विद्वान् कश्चित्सन्तानरहितः, कचित्परिवारयुक्तः, कश्चिदल्पायुः, कश्चिद्दीर्घायुः, इत्यादि ग्रहनक्षत्र-योग-बलाद्भवतीतिज्यौतिषशास्त्रे प्रत्यक्षमसंख्यातानि योगसहस्राणिदृश्यन्ते, घटन्ते च ते सर्वे स्पष्टरूपेण। तत्र येषां यादृक्प्राक्तनं कर्म तदनुसारमेव शुभाशुभ योगे जन्मगृह्णन्तः इह तत्कर्मवशेन शुभाशुभं फलं भुञ्जते जीवगणाः।

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिम्।
व्यञ्जयति शास्त्रमेतत्तामसि द्रव्याणि दीप इव॥ इति

अत एव कस्मिन् समये, लग्ने नक्षत्रादौ च जन्म इति विज्ञाय, जन्मकालिकीं ग्रहस्थितिं ज्ञात्वा जातानां मनुष्यादीनां शुभाशुभफलयोर्निर्णयं ज्यौतिषशास्त्रद्वारा कुर्वन्तीदानीन्तनास्तज्ज्ञाः। तानि शुभाशुभानि ज्ञात्वा तन्निवृत्यै शान्तिस्वस्त्ययनतपोनियमजपाद्यनुष्ठानानि वेदोक्तरीत्या कृत्वा शान्तिं प्राप्नुवन्ति सदाचारवन्तः सज्जनाः स्वाभीष्टफलञ्च लभन्त इति शिवम्॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"गावः प्रतिष्ठाः सचराचरस्य"

(ले० —श्री रामेश्वर चौधरी, आयुर्वेदाचार्यः,
गवेषकः—का० सिं० द० सं० वि० वि० दरभंगा)

यथा माता पुत्रं सर्वतो रक्षति पालयति प्रीणयति, सर्वदा तस्मिन् स्निह्यति, न च कदापि विरज्यते पुत्रात्, तथा गौरपि मानवान् सर्वापद्भ्यो रक्षति पालयति प्रीणयति दुग्धादिना, स्निह्यति चान्तश्चेतसा, आशीर्वादैः संवर्धयति च।

अत्र किमस्ति वस्तु यद् गवामेव कृपया नोत्पन्नं स्यात् सर्वप्रथमं जीवनौषधिरूपमन्नमेव गृह्यताम्—गोजाता वृषा हलैर्भूमिं कर्षयन्ति खनन्ति उर्वरां कुर्वन्ति तैरेवोप्यन्ते क्षेत्राणि कूपेभ्यो जलमुद्धृत्यचसिच्यन्ते। सम्पन्नं परिपक्वं च तत्सस्यं पुनस्तैरैव संशोध्यते गृहं प्रत्यानीयते च। कोवाऽस्ति मानवो जगति योऽन्नं वस्त्रं वा विनाजीवितुमपि शक्नुयात्। तदुभयमिदं भारतवर्षे तु गवामेव कृपया लभ्यते।

अन्नाद् व्यतिरिक्तं मानवजीवनोपयोगि सर्वमन्यदपि गावएव प्रयच्छन्ति, पश्यत--जातमात्रस्य हि शिशोर्मातृस्तन्यादतिरिक्तं गोदुग्धमेव प्राथमिकं भोजनम्, येन स प्राप्नोति अवश्यप्रापणीयां शारीरिकीं पुष्टीम्। अथान्नभक्षणयोग्यो भूत्वापि अन्नैः सार्द्धं परमापेक्षितान् दुग्धदधिघृतादीन्स्निग्धपदार्थान् लभते खलु गवामेवानुकम्पया। नास्ति मानवजीवनस्य कोऽपि भागो यत्र गोभिरुपकारो न विधीयते। अन्ते मरणकालेऽपि गोदानमेव पारलौकिकश्रेयःसाधकम्। गावएव च ऐहलौकिक-पारलौकिक-श्रेयः साधनीभूतस्य धर्मस्य सर्वप्रधानमङ्गम् गव्यैरेव पदार्थैः सम्पद्यते यज्ञः, गवामेव च दुग्ध-दधि-घृतादिभिः सम्पन्नेन पञ्चामृतेन भवति पूजनं देवतानाम्। प्रायश्चित्तेषु चान्तर्बहिः शुद्धिमभीप्सुभिरुपयुज्यते गवामेव पयो-दधि-घृत-मूत्र-गोमयमयं पञ्चगव्यम्, इदम् अन्तःकरणमलानां कामक्रोधादीनां शारीरिका-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णाञ्च धातुवैषम्यजनितानामतिदूषितानामपि रोगाणां परमं शोधकं निवारकञ्चास्ति । दुग्धं प्राणिनामाहारः इति कथ्यते यथा—

तत्र सर्वमेव क्षीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात् ।

(सुश्रुतः सूत्र० अ० ४५)

शतपथब्राह्मणेऽपि--"एतद्वैपय एव अन्नं मनुष्याणाम्" २-५-१६" दुग्धमेव मानवानां प्रधानान्नम् अस्ति इति कथ्यते । पाश्चात्यविज्ञानशास्त्रिभिः परीक्ष्येदं निर्णीतं यद् गोदुग्धे सन्ति तानि सर्वाण्यपि तत्त्वानि यानि मानवजीवनायपरमोपयोगीनि, यानि च मानवस्य भोजनेऽपेक्ष्यन्ते । भारतीयायुर्वेदशास्त्रिभिश्च सर्वं दुग्धेभ्यो गोदुग्धस्यैवोत्तमत्वमुद्घोष्यते सर्वेष्वपि रोगेषु च क्रियते तस्यैवोपयोगः । उच्यते च गोदुग्धविषयेः—

स्वादुशीतं मृदुस्निग्धं वहलं श्लक्ष्णपिच्छिलम् ।
गुरुमन्दं प्रसन्नं च गव्यं दशगुणं पयः ॥
तदेकगुणमेवौजःसामान्यादभिवर्धयेत् ।
प्रवरं जीवनीयानां क्षीरमुक्तं रसायनम् ॥

(च० सू० अ० २७)

गव्यं क्षीरं विशेषेण मधुरं रस पाकयोः ।
शीतलं स्तन्यकृत स्निग्धं वातपित्ताऽस्रनाशनम् ॥
दोषधातुमलस्रोतः किञ्चित क्लेदकरं गुरु ।
सर्वदाऽखिलरोगाणां जरायाश्चऽपि शान्तिकृत् ॥

(शा० ग्रा० नि०)

धेनोः पयः स्मान्मधुरं सुशीतंरसायनं स्निग्धमलं गुरुस्यात् ।
भ्रमश्रमघ्नं विषहृत्समं च कफावहं शुक्रकरं हि वर्ण्यम् ॥

(महौषधिनिघन्टु)

अन्यच्च—

गव्यं क्षीरं पथ्यमत्यन्तरुच्यं स्वादुस्निग्धं पित्तवातामयघ्नम् ।
कान्तिप्रज्ञाबुद्धिमेधाङ्गपुष्टिधत्ते स्पष्टं वीर्य्यवृद्धिविधत्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षीरं हि सद्योवलमादधाति दृढीकरोत्याशु तथेन्द्रियाणि ।
मेधायुरारोग्यसुखानिधत्ते रसायनं चापि वदन्ति मुख्यम् ॥
पुष्टिं दृढत्वं लभते च गर्भो बन्ध्या च षण्डश्च जरंश्चसूते ।
पायुं पयः शोधयतेऽनुलोमं करोति वातं लघुतां नराणाम् ॥
तस्माच्च सर्वेषु रसायनेषु रोगस्यचान्ते प्रवदन्ति दुग्धम् ।

अपि च—

क्षीरं सात्म्यं, क्षीरमाहुः पवित्रं क्षीरंमङ्गल्यं क्षीरमायुष्ययुक्तम् ।
क्षीरं वर्ण्यं, क्षीरमाहुश्चकेश्यं, क्षीरं सन्धानं क्षीरमाहुर्वयस्यम् ॥
क्षीरं सर्वेषां देहिनां चानुशेते, क्षीरं पिबन्तं च न रोगएति ।
क्षीरात्परं नान्यदिहास्ति वृष्यं क्षीरात् परं नास्ति च जीवनीयम् ॥

काश्यपसंहितायां—

दुग्धसेवनयोग्यरोगिणः—

तत्स्वस्थवृत्तौ च हितं वदन्ति रोगेनिवृत्तो ज्वलने च मन्दे ।
रोगे निवृत्ते ज्वलने च दीप्ते रोगै र्विमुक्ताः कृशदुर्बलाश्च ॥
क्षीणेन्द्रियावर्णबलाग्निहीना वातादिताः पित्तनीपिडिताश्च ।
ज्वरातिसारोदरपायुरोगचिन्ताप्यमानाध्वगरोगतप्ताः ॥
कासेन शस्त्रेण विषेण चैव निपीडिताः शोकहताश्च नित्यम् ।
व्यायामगेयाध्ययनश्रमार्ता धूमाग्निवातातपजागरार्ताः ॥
विदह्यमानाक्षिगलास्यनासा विषीदमानाः स्मृतिबुद्धिहीनाः ।
आनाहिनः शुष्कपुरीषमूत्रा भगन्दरार्शोग्रहकुण्डलार्ताः ॥
निष्पिष्टभग्नच्युतपीडिताङ्गे शुद्धव्रणे मांसविवर्जिते च ।
जीर्णज्वरान्येद्युतृतीयकेषु नित्यज्वरेचापि चतुर्थके च ॥
रक्षःपिशाचोरगभूतयक्षक्षुद्व्रज्रतृष्णाग्निहिमाहताश्च ।
स्त्रीबालपुत्राल्पविशुष्कदुग्धा गर्भश्चयस्यान विवर्धते च ॥
नाप्यायते यः स्तनपश्च वालोजागर्ति नित्यं भृशरोदनश्च ।
चक्षुर्हतिर्यस्य च तीक्ष्णनस्यै र्विशोषणैर्वा प्रतिकर्मणा वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आहारविशेषे गुणविशेषाः—

स्वल्पान्नभक्षणाज्जातं क्षीरं गुरुकफप्रदम् ।
तत्तुवर्ण्यं परं वृष्यं सुस्थानां गुणदायकम् ॥
पलालतृणकार्पासवीजजातं गुणैर्हितम् ॥
(भावप्रकाश)

अवस्थाविशेषेगुणाः—

तरुणीनां गवां दुग्धं मधुरं च रसायनम् ।
त्रिदोषशमनं चैव वृद्धाया दुर्बलं मतम् ॥
सगर्भायाः समुद्दिष्टं त्रिमासोर्ध्वं च पित्तलम् ।
क्षारं च मधुरं चैव मतं वैशोपकारकम् ॥
प्रथमं च प्रसूतायानिःसारं गुणहीनकम् ।
नूतनप्रसूतगोदुग्धं रुक्षं दाहकरं मतम् ॥

अन्यच्च—

गव्यं दध्युत्तमं बल्यं पाकेस्वादुरुचिप्रदम् ।
पवित्रं दीपनं स्निग्धं पुष्टिकृत्पवनापहम् ॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ॥
(भावप्रकाश)

अरोचके पीनकासकृच्छ्रे शीतज्वरे तद्विषमज्वरे च ।
दुर्नामरोगे ग्रहणीगदे च गव्यं प्रशस्तं दधि सर्वदैव ॥
(शालिग्राम निघण्टु)

गोतक्र गुणाः—

गव्यं त्रिदोषशमनं पथ्ये श्रेष्ठं तदुच्यते ।
दीपनं रुचिकृन्मेध्यमर्शोदरविकारजित् ॥
(शालिग्रामनि०)

गवां मूत्रं गोमयं चापि कियतां रोगाणामस्ति परमौषधम् । गोमूत्रेण प्रायः सर्वेऽपि उदररोगाविनश्यन्ति, आमवातस्य चेदं परिपूर्णमौषधम् । कृमिरो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाणाञ्च, महारोगस्य कुष्ठस्यापि सर्वोत्तममौषधं गोमूत्रम्। गोमूत्रस्य निरन्तरपानेन स्नानेन च कुष्ठं सर्वथा विनश्यति। यकृत्प्लीहादीनामुदररोगाणान्तु प्रसिद्धमिदमौषधम्। तस्यगुणाः—

गव्यं समधुरं किञ्चिद्दोषघ्नं क्रिमिकुष्ठनुत्।
कण्डूं च शमयेत् पीतं सम्यग्दोषोदरेहितम्॥

(चरक सू० अ० १)

गोमूत्रं कटुतीक्ष्णोष्णं क्षारं तिक्तकषायकम्।
लघ्वग्निदीपनं मेध्यं पित्तकृत्कफवातहृत्॥
शूलगुल्मोदरानाहकण्डूक्षिमुखरोगजित्।
कीलासगदवातामवस्तिरुक्कुष्ठनाशनम्॥
कासश्वासापहं शोथकामलापाण्डुरोगहृत्।

कण्डूकिलासगदशूलमुखाक्षिरोगान्गुल्मातिसारमरुदामयमूत्ररोधान्। कासं सकुष्ठजठरक्रिमिपाण्डुरोगान्गोमूत्रमेकमपि पीतमपाकरोति। सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम्। अतोऽविशेषात्कथने मूत्रं गोमूत्रमुच्यते। प्लीहोदरश्वासकासशोथवर्चोग्रहापहम्। शूलगुल्मरुजानाहकामलापाण्डुरोगहृत्। कषायं तिक्ततीक्ष्णं च पूरणात्कर्णशूलनुत्। ॥ भावप्रकाशः ॥

एतेषां गोमयमपि पवित्रं लाभप्रदञ्चभवति। गोमयं पामादिचर्मरोगाणां सिद्धमौषधम्, सांक्रामकरोगाणां कीटाणवश्चानेन नश्यन्ति। गोमयरसे विषूचिका [हैजा] रोगनाशिका विचित्रा शक्तिर्विद्यते इति पाश्चात्यविज्ञानिनोऽपि मन्यन्ते। धर्मशास्त्रिणस्तु स्थाने-स्थाने गोमयलेपनायाऽऽदिशन्ति, गोमयस्य गन्धेनैवासङ्ख्याः सांक्रामकरोगाणां कीटाणवो विनश्यन्ति, नवीनानां च तेषां न भवत्युद्भवः॥

गवां श्वासैरनन्ता रोगा विनश्यन्ति, विशेषतश्चक्षयरोगः। क्षयरोगी गवां मध्ये वसन् नीरोगतामासादयति, हृद्रोगी च गवां दर्शनेन स्पर्शनेन तन्मध्यनिवासेन च सद्यो रोगात्तस्माद् विमुच्यते।

एवं प्राच्यायुर्वेददृष्ट्या पाश्चात्यविज्ञानदृष्ट्या च मानवानां स्वास्थ्यरक्षणविधौ विद्यते गवां सर्वोत्तमं स्थानम्। कोऽपि न वक्तुं शक्नोति गोर्महत्वम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गवामेव सेवया लौकिकं पारलौकिकं च श्रेयोभवति। कोनजानाति रघुवंशविभूषणस्य राज्ञो दिलीपस्य, सत्यकामस्य गौतमशिष्यस्य तथा परमाराध्यभगवत्कृष्णचन्द्रस्य गोसेवाफलम्। सर्वमिदं गवां माहात्म्यं ज्ञानचक्षुषानिरीक्षमाणा महर्षयः शास्त्रेषु स्थाने-स्थाने गवां महिमानं वर्णयामासुः, समीहन्तेस्म च—

दिव्येन च ज्ञानबलेन दृष्टं,
सुरैयैः पुरा मन्थनमस्य युक्त्या।
ततो घृतोदधिदुपोपलभ्य,
गावः प्रतिष्ठाः सचराचरस्य॥

—०—

"कोकिला जातावपि"

प० श्रीभगीरथमिश्र एम० ए० व्याकरणाचार्यः
भूतपूर्व केन्द्रीय-गवेषकः कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयः

अजाद्यतष्टाबिति सूत्रं स्त्रीलिङ्गविवक्षायामदन्तेभ्यः प्रातिपदिकेभ्यष्टापं विधत्ते यथा "रमा" इत्यादि। परन्तु अयं टाप् क्वचिद् ङीषा क्वचिच्च ङीपा बाध्यते। यत्र च अदन्तत्वात् प्राप्तं टापं बाधित्वा ङीप् प्राप्तः किन्तु इष्यते टाबेव तत्र ङीषादिकं बाधित्वा टाव्यथा स्यादित्येतदर्थं सूत्रेऽजादिग्रहणं क्रियते। अतः कोकिलत्वजातिविशिष्टा स्त्रीत्यर्थे कोकिलशब्दात् अदन्तत्वाट्टाप् प्राप्नोति। तं बाधित्वा च जातेरस्त्रीविषयादयोपधादिति ङीष् प्राप्तः। तं ङीपं बाधितुमजातिगणे कोकिलाशब्दः पठ्यते। तेन कोकिलत्वजातिविशिष्टास्त्रीत्यर्थे टाबेव भवति।

एवमेव कोकिलशब्दस्य दाम्पत्यसम्बन्धेन तत्स्त्रियां लक्षणायां कोकिलस्य स्त्रीत्यर्थेऽपि कोकिलशब्दात् अदन्तत्वाट्टाप् प्राप्तः। तञ्च बाधित्वा पुंयोगादाख्याया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिति ङीष् प्राप्तः । तमपि (पुंयोगलक्षणं ङीषमपि) बाधित्वा अजादित्वाट्टाबेव भवति । अतः कोकिलत्वजातिविशिष्टा स्त्रीत्यर्थो विवक्ष्यताम् कोकिलस्य स्त्रीत्यर्थो वा उभयथाऽपि (जातौ पुंयोगे च) कोकिला इत्येव रूपं भवति । तदेतदुच्यते सिद्धान्तकौमुद्याम् "कोकिला जातावपि" इति । अत्रापि शब्देन पूर्वोपात्तः प्रयोगः समुच्चीयते ।

इदमत्र विवेचनीयम् —

यथा जातौ पुंयोगे च कोकिलेति टाबन्तमेव रूपं भवति तथा अजा एडका इत्याद्यपि जातौ पुंयोगे च स्यात् । तथा च अजा एडका इत्यादावपि यथा जातिलक्षणो ङीष् बाध्यते तथैव पुंयोगलक्षणोऽपि ङीष् बाध्येत । एवञ्च "अजा एडका अश्वा चटका मूषिका एषु जातिलक्षणो ङीष् प्राप्तः" इति सिद्धान्तकौमुदी ग्रन्थोन्यूनः । तत्र हि "जातिलक्षणः पुंयोगलक्षणश्च ङीष् प्राप्तः" इत्युक्तिरुचितेति ।

तत्रेदं रहस्यम्—स्त्रीपुंससाधारणी अजत्वैडकत्वादिजातिरेकैवेति अजस्य स्त्रीत्यर्थे अजशब्दस्य लक्षणा न सम्भवति । मुख्यार्थबाधो हि लक्षणायाः बीजम् । अजस्य स्त्रियामजत्वञ्चन बाधितम् । एवञ्च अजा एडका इत्यादौ पुंयोगाख्यायामित्यस्य प्रातिरेव नास्तीति तत्र पुंयोगलक्षणस्य ङीषः प्राप्तिर्न प्रदर्शिता ।

कोकिलत्वन्तु स्त्रीपुंसाधारणं नैकम्, अपितु स्त्रियां कोकिलत्वमन्यदेव पुंसि च कोकिलत्वमन्यदेव । अर्थभेदाच्छब्दभेद इति च सिद्धान्तः । एवञ्च पुंनिष्ठकोकिलत्वविशिष्टस्य स्त्रियां प्रयोगो दाम्पत्यसम्बन्धेन लक्षणां विना न सम्भवति । स्त्रियां हि पुंनिष्ठा कोकिलत्वजातिर्बाधिता । अतः पुंवाचकात् कोकिलस्य स्त्रीत्यर्थे पुंयोगलक्षणो ङीष् प्राप्नोत्येव । तस्मात् कोकिलाजातावपीति कथनं युक्तमेव ।

स्त्रियामन्यदेव कोकिलत्वं पुंसि चान्यदेव कोकिलत्वमित्यत्र किं बीजमिति चेदुच्यते यथा परस्परमत्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशरूपेण तादृशेन पार्थिवघटनिष्ठं घटत्वं राजतादिघटनिष्ठञ्च घटत्वं विभिन्नमेव तथा विभिन्नानुगतसंस्था-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नव्यङ्गयत्वेन स्त्रीनिष्ठं कोकिलत्वमन्यदेव पुंनिष्ठञ्च कोकिलत्वमन्यदेव। यथा हि पुमांसमजं परिचपितः कश्चन स्त्रियमप्यजां संस्थानसाम्यात् स्वतः परिचिनोति न तु पुनः परिचपनमपेक्षते न तथा पुमांसं कोकिलं परिचपितः स्त्रियं कोकिलां परिचेतुं स्वतः प्रभवति तयोर्द्वयोः संस्थानवैषम्यात्। पुमान् हि कोकिलो भास्वरकृष्णवर्णः अतिलोहिताक्षः तनुचञ्चुः दीर्घपुच्छश्च। दृष्टे तस्मिन् काककिशोरोऽयमिति भ्रमोभवति। कोकिला तु धूसरवर्णा श्वेतस्थूलप्रकृति श्च तदेतच्छक्यते साक्षात्कर्तुम्। उक्तं हि—

Birds of an Indian village नामक ग्रन्थे Douglas Dewar महाशयेन—

The cock koel is a shining black bird with bright red eyes. He has a slender bill and long tail. He might be mistaken for a crow. The hen is a brown bird largely spotted with white.

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दः शब्दार्थौ च काव्यम्

(एकं स्पष्टीकरणम्)

(लेखिका—श्रीमीनाकुमारी शास्त्री, साहित्याचार्या)
Central research scholar for Ph. D.
म०म० लताविद्यापीठम्, लोहना

कवेः कर्म काव्यमिति योगार्थेन शब्दस्येवार्थस्यापि काव्यत्वमिति शब्दार्थौ काव्यमिति प्रामाणिकाः। 'काव्यमुच्चैः पठ्यते' इत्यादिविश्वजनीनव्यवहारेण शब्दमात्रं काव्यं, न तु शब्दार्थौ, काव्यशब्दस्य शब्दार्थयुगले शक्तौ प्रमाणाभावात् इत्यन्ये।

अत्रेदं प्रतिभाति—

'एकपदाऋक्' 'एकं च सूक्तम्' इति व्यवहारेण ऋक्त्वसूक्तत्वादेरिव 'एकश्लोकं काव्यम्' इति व्यवहारेण काव्यत्वस्यापि शब्दार्थोभयवृत्तित्वमावश्यकम्। हरिभाष्ये 'अत्राप्यर्थेन युक्तो व्यपदेश' इति। एवञ्च शब्दमात्रं, शब्दार्थौ च काव्यम्।

पण्डितराजोक्तस्य व्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वविकल्पस्य चेदं समाधानम् काव्यपदप्रवृत्तिनिमित्तं काव्यत्वं जातिः। तच्च समवायेन शब्देऽर्थे चास्ति। परन्तु काव्यप्रवृत्तिनिमित्ततावच्छेदकः सम्बन्धो न शुद्धसमवायः अपि तु शब्दाऽनुयोगिकः समवायः। तेन च सम्बन्धेन काव्यत्वं शब्दमात्रे इत्यव्याप्यज्यवृत्ति शब्दार्थसमुदाये ऽस्तीति चव्याप्यज्यवृत्ति। अतो न 'श्लोकवाक्यं न काव्य'मिति व्यवहारस्यापत्तिः, न वा एकस्मिन् काव्ये काव्यद्वयव्यवहारापत्तिः केवलस्यार्थस्य तु काव्यत्वाभावात्।

एकत्र काव्यत्वे व्याप्यज्यवृत्तित्वाव्याप्यज्यवृत्तित्वयोः समावेशस्तु वृक्षे कपिसंयोगतदभावयोरिवावच्छेदकभेदेन सम्भवत्येव।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यलक्षणनिरुक्तिः

[ले० श्रीअर्जुनझा, साहित्याचार्यः, एम० ए०]

विदितमेवास्ति सर्वेषां सहृदयधुरीणानां यत् काव्यानुशीलनेन लौकिकसकल सुखापेक्षया वेद्यान्तरसम्पर्कशून्यत्वेन समुत्कृष्टं सुखमुदेतितराम् । यशोऽर्थादीनां लौकिकसुखसाधनानामपि सिद्धिरनेन बाढमुपजायते तदुक्तं काव्यप्रकाशकारेण —

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्ता सम्मिततयोपदेशयुजे ॥"

एवञ्च सकलजनकामनाविषयीभूतं कमप्यन्यमानन्दं समर्पयितुमीशं काव्यस्वरूपं विद्वद्दृभिरवश्यं विज्ञेयमिति मनसिकृत्य काव्यानुशासनपण्डितैः प्रथमं काव्यलक्षणमेव प्रत्यपादि । नहि काव्यविषयकविशेषज्ञानमन्तरेण कश्चित् कविः काव्यं कर्तुं सहृदयो वा कश्चिद् काव्यरसमास्वादयितुं शक्नोति ।

यद्यपि तत्तदाचार्यैः स्वस्वनिबन्धेषु भिन्नं-भिन्नं काव्य लक्षणं निरूपितं तथापि तेभ्यः सन्तोषमनासादयन् काव्यमर्मज्ञः पण्डितराजो जगन्नाथः स्वीये रसगङ्गाधरे पूर्वाचार्यकृतलक्षणेभ्यो विलक्षणं काव्यलक्षणं न्यरूरूपत्—

"रमणीयार्थप्रतिपादकः शब्दः काव्यमिति" ।

यादृशामार्थानां ज्ञानेन सचेतसां चेतश्चमत्कृतं भवति तादृशा वाच्यलक्ष्य व्यंग्यात्मकार्था रमणीयपदव्यपदेश्यतामश्नुवते, तादृशार्थप्रतिपादकः शब्दएव काव्यपदेन व्यवह्रियते । तथा च रमणीयार्थप्रतिपादकत्वे सति शब्दत्वमिति काव्यलक्षणं पर्यवस्यति । अत्र लक्षणे अनुरागादिरूपरमणीयार्थस्य व्यञ्जके कटाक्षनिक्षेपादौ अतिव्याप्तिर्माभूदित्येतदर्थं शब्दपदोपादानम् चमत्काराजनकार्थबोधके घटमानय इत्यादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्ये अतिव्याप्तिनिरासार्थमर्थस्य रमणीयत्वविशेषणम् । वाचकत्वादेः विशिष्य निवेशने व्यञ्जकत्वादेः ग्रहणासम्भवेन तथाविधार्थवाचके शब्दे अव्याप्तिः स्यात् अतः लक्षणे प्रतिपादकत्वकथनं रमणीयशब्दप्रतिपादके शब्दानुशासने लक्षणातिव्याप्तिः माप्रसाङ्क्षीदित्यतश्चात्र लक्षणे अर्थस्य प्रवेश इति बोध्यम् ।

एवञ्च लक्षणघटकसकलपदानामुक्तदिशा प्रयोजनविशेषसिद्धिफलकतया सार्थकत्वेसिद्धे लक्षणमिदं सकलदोषविवर्जितमिति विभावनीयम् ।

ननु रमणीयतार्थस्य न वर्तते व्यवस्थितता । च एवार्थः कस्मैचिद्रोचते स एवान्यस्मै न रोचते । अतः लक्षणेऽस्मिन् कीदृशं रामणीयकं विवक्षितमिति चेत् श्रूयताम् पण्डितराजस्यैवोक्तिः, रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरतेति । यदर्थज्ञानेन लोकोत्तराह्लादः सञ्जायते स एवार्थः प्रकृते रमणीय इति निगद्यते । अथ काव्यानन्दस्य लोकोत्तरत्वमेव कीदृशमभिप्रेतमिति चेत् साधुजिज्ञाससे । आनन्दनिष्ठः चमत्कारत्वापरपर्यायः सहृदयसमाजानुभवसाक्षिकः ज्ञातिविशेष एव लोकोत्तरत्वमित्येवहि । आनन्दगतं चमत्कारत्वमेव लोकोत्तरत्वं चादृशानन्दोपलंभानन्तरं सहृदयाः स्वीयमानन्दं लौकिकसकलसुखापेक्षया विक्षणतया लोकोत्तरमनुभवन्ति श्रुतोऽयमर्थश्चेतश्चमत्कारोतीति च प्रतियन्ति स एवानन्दः चमत्कारापरपर्यायोवेति निभालनीयम् ।

अत्र चमत्कारस्य कारणं किम् इति जिज्ञासायाम् पण्डितराजेनोक्तं "कारणं च तदवच्छिन्ने भावना विशेषः पुनः पुनरनुसन्धानात्मा" इति । चमत्कारत्वरूप लोकोत्तरत्वजात्यवच्छिन्ने आनन्दे काव्यार्थभावनाविशेषः कारणम । स च भावनाविशेषः काव्यार्थस्य "पुनः पुनरनुसन्धानात्मक" इति तदर्थः । अयम् भावः काव्यश्रवणानन्तरं शक्तिस्मरणादिभिः शाब्दसामग्रीतः प्रथमं वाच्यार्थबोध उदेति तदनु सति व्यंग्यार्थे व्यञ्जनया तद्बोधः सञ्जायते । स च सहृदयेभ्यो भृशं रोचते । अतस्ते तादृशं बोधं पुनः पुनः शब्दमनुसन्धाय पौनःपुन्येन सम्पादयन्ति वाच्यार्थबोधस्यैव प्रचुररुचिकरत्वे तु तदर्थमेव सहृदयाः प्रयतन्ते । तत्र तादृशबोधप्रवाह एव सातिशयं चमत्कारं समर्पयति । आनन्दे लोकोत्तरत्वनिवेशश्च अकाव्ये काव्यत्व प्रसक्तिवारणाय तथाहि "पुत्रस्तेजातः धनं ते दास्यामि" इत्यादिवाक्यश्रवणानन्तरं-महि जनाः प्रभूतमानन्दमनुविन्दन्ति । तस्मादुक्तवाक्यस्यापि आनन्दजनका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्थज्ञापकतया काव्यत्वं प्रसज्येत। लोकोत्तरत्वनिवेशे तु तत्र काव्यात्वापत्तिर्न भवति तदानन्दस्यालौकिकत्वाभावात्।

एवञ्च काव्यगतोक्तविशेषपरिशीलनानन्तरं पण्डितराजानुसारेण काव्यलक्षणमित्थं शक्यते परिष्कर्तुं—"चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वं, यत् प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वं, स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारवत्त्वमेव वा काव्यत्वमिति"। लक्षणानि एतानि स्वरूपतो भिन्नानि अपि नार्थतो भिन्नानि प्रतिभान्ति। तथाहि तेषाम् समन्वयार्थं समानाया एव वस्तुस्थितेरादरात् द्वितीयलक्षणानुसरणबीजस्य सुलभत्वेऽपि तदर्थं परिस्थितिभेदस्यानङ्गीकारात्।

काव्येन प्रतिपादितोऽर्थः लोकोत्तरम् आनन्दं जनयति इति वस्तुस्थितिः प्रागभिहिता। तथा च या नाम भावना चमत्कारं जनयति सा काव्यप्रतिपादितार्थविषयिणी भावना चमत्कारजनिका। इत्थञ्च चमत्कारजनकभावनाविषयार्थप्रतिपादकत्वं काव्यशब्देषु घटते। तथैव काव्यार्थविषयकभावनायाः चमत्कारजनकतया तादृश-भावनात्वस्य, तादृशजनकतावच्छेदकत्वात् द्वितीयलक्षणमपि घटते। अपि च यदर्थविषयकभावनायाः चमत्कारजनकत्वं तदर्थस्यापि विषयतया तादृशजनकतावच्छेदकत्वमित्यतः काव्यार्थे चमत्कारस्य स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकत्वं संसर्गः तेन च संसर्गेण काव्ये चमत्कारत्ववत्ता च समुपपद्यते इति तृतीयस्यापि लक्षणस्य समन्वयो बोध्यः।

ननु मम्मटादीनां महतामाचार्याणाम् "अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमिति" काव्यलक्षणस्य सत्त्वे किमर्थमभिनवलक्षणकरणे पण्डितराजः प्रायततेति चेन् मैवंवोचः। काव्यप्रकाशकारेण मम्मटभट्टेन शब्दार्थोभयस्य काव्यत्वमङ्गीकृतम् तत्तु न समीचनम्, काव्यमुच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञातः इत्यादि विश्वजनीनव्यवहाराणां शब्दार्थोभयस्य काव्यत्वेऽनुपपतेः। अर्थस्य काव्यपदार्थत्वे तस्य उच्चारणरूपपाठायोग्यत्वेन पठ्यते इति व्यवहारः अर्थस्यापि काव्यान्तर्गतत्वेन तस्य काव्यादर्थोऽवगम्यते इति पृथगुल्लेखः श्रवणयोग्यस्य तस्य काव्यघटकत्वे काव्यंश्रुतमिति श्रवणोक्तिः, काव्यश्रवणेऽपि अर्थाज्ञानोक्तिश्च नोपपद्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः उक्तन्यवहारानुरोधेन शब्दस्यैव काव्यत्वं स्वीकर्तुमुचितम् न तु शब्दार्थोभयस्येति ।

न च यथा पूर्वं पाञ्चाला इत्यादौ समस्तपाञ्चालदेशवाचकपाञ्चालशब्दस्य तदेकदेशे लक्षणा तथैव शब्दार्थोभयवाचककाव्यशब्दस्य काव्यैकदेशे लक्षणा ततश्चोक्तन्यवहारस्येव काव्यंश्रुतमित्यादिव्यवहाराणामपि स्यादुपपत्तिरिति वाच्यम् । शब्दार्थयुगले काव्यपदशक्तेः साधकस्य प्रमाणस्यानुपलम्भात् । मम्मटादीनामुक्तिरेव प्रमाणमिति तु न वाच्यम् , तन्मतनिराकरणप्रसङ्गे तदुक्तेः प्रामाण्यस्य अमान्यत्वात् । एवञ्च काव्यशब्दस्य शब्दार्थोभयशक्तिग्राहकप्रमाणानुपलम्भात् प्रागुक्तन्यवहारानुरोधेन शब्दविशेष एव काव्यपदशक्तेः सिद्धौ शब्दार्थोभयघटितम् मम्मटादीनां काव्यलक्षणं न चारु इति पण्डितराजाशयः ।

नेयं वार्ता काव्यमात्रस्य अपि तु वेदादीनामपि ईदृश्येव गतिः । तत्रापि वेदः पठ्यते, वेदादर्थोवगम्यते इत्यादि व्यवहारानुरोधेन शब्दपरतैव वेदादिशब्दानां स्वीकार्या अन्यथोक्त व्यवहारानुपपत्तेः । ततश्च तल्लक्षणमपि शब्दविशेषमात्रवृत्त्येवेति बोध्यम् ।

अथ काव्यं हि चमत्कारप्राणं, चमत्कारश्च शब्दादिव अर्थादपि भवति इति शब्दस्येव अर्थस्यापि काव्यत्वं मन्तुमुचितमिति चेत् हन्त कुतोदुराग्रहं प्रकटयसि । चमत्कारसमर्पकत्वस्य काव्यत्वप्रयोजकत्वाङ्गीकारे रागादीनामपि चमत्कारप्रयोजकत्वेन काव्यत्वापतेः । आनन्दवर्धनप्रभृतयो हि आचार्याः रागस्य रसव्यञ्जकतामङ्गीकृतवन्तः । तदिष्टापत्तौ तु नृत्यवाद्यनेपथ्यादीनामपि नाट्याङ्गानां काव्यत्वमापद्यते । न च तदिष्टं भवितुमर्हति तस्मात् शब्दस्यैव काव्यत्वं न शब्दार्थोभययुगलस्येति ।

अयमपि प्राचीनलक्षणे दोषो द्रष्टव्यः काव्यत्वस्य शब्दार्थोभयवृत्तित्वे प्रश्नस्तावदयमुदेति यत् काव्यत्वं व्यासज्यवृत्ति प्रत्येकपर्याप्तं वा ? यदि नाम व्यासज्यवृत्ति तर्हि श्लोकवाक्यं न काव्यमिति व्यवहारापत्तिः । एकस्य उभयात्मकत्वाभावेन यथा एको न द्वौ इति व्यवहारोभवति तथैवश्लोकवाक्यस्यापि शब्दार्थोभयात्मकत्वाभावेनोक्तन्यवहारः प्रसज्येतैव । द्वितीयोऽपि प्रत्येकपर्याप्तिपक्षः न समीचीनः तथा सति एकस्मिन्नपि काव्ये काव्यद्वयव्यवहारापत्तेः । तथा च शब्द विशेषस्यैव काव्यत्वाक्रान्ततया तदनुसार्य्येव काव्यलक्षणं चारु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमु शब्दार्थोभयघटितलक्षणस्य स्वानभिमतत्वेऽपि "वाक्यं रसात्मकं काव्यम्" इति विश्वनाथस्य काव्यलक्षणं पण्डितराजेन कथं नाङ्गीकृतमिति चेत् तदाशयं बोद्धुं यतस्व। रसात्मकत्वस्यैव वाक्यस्य काव्यत्वेवस्त्वलंकारप्रधानानां काव्यानामकाव्यत्वापत्तिः स्यात्। तदापत्तेरभ्युपगमेऽपि महाकविसम्प्रदायस्यैव समुच्छेदः स्यात्। दृश्यते हि बहुभिर्महाकविभिः जलप्रवाहादीनि कपिबालादिविलसितानि वर्णितानीति। नतु तत्र रसानुभूतिरस्ति। विभावादिद्वारकरससम्बन्धस्तत्रापि वर्त्तते इति चेत् तर्हि "गौश्चलति, मृगोधावति," इत्यत्राऽपि परमपरया रससम्बन्धसत्त्वात् काव्यत्वापत्तिः स्यात्। अर्थमात्रस्य हि विभावानुभावाव्यभिचारिभावान्यतमात्मकतया तद्वारकरससम्बन्धस्य सत्त्वात् सर्वेषां वाक्यानां काव्यत्वापत्तिरित्याशयः।

इत्थञ्च मम्मटलक्षणे विश्वनाथलक्षणे चारुचिप्राचुर्यम् प्रदर्श्य महामनीषिणा जगन्नाथेन स्वाभिप्रायानुसारं नूतनमतिविलक्षणं काव्यलक्षणं समुद्भावितम्। यद्यपि प्राचीनेषु काव्यलक्षणेषु पण्डितराजप्रदर्शितानां दोषाणामपाकरणमपि महामहोपाध्याय गोकुलनाथोपाध्यायप्रभृतिभिः सम्यग् विहितम् तथापि तेन प्राचीनलक्षणस्य निर्दोषत्वे सिद्धेऽपि रमणीयार्थप्रतिपादकः शब्दः काव्यमित्यस्य पण्डितराजकृतलक्षणस्य रमणीयता न विलीयत इत्यतः एतल्लक्षणविचारप्रसङ्गे एतदुद्भावितदोषाणां निरासप्रकारेषु ताटस्थ्यमवलम्ब्यते। इति॥

—:०:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमाणोः सावयवत्वनिरूपणम्

श्रीव्रजकिशोरझा, अ० वि० सं० महाविद्यालयः,
रहीमपुरम्, खगड़िया [मुङ्गेर]

अप्रत्यक्षोऽणुतमपरिमाणः परमाणुरस्ति नैयायिकातां मते किन्तु ज्यौतिषसिद्धान्ते कमलाकरभट्टकृतसिद्धान्ततत्वविवेकस्थावर्गाङ्कमूलानयनरीतिपर्यालोचनया परमाणोः सावयवत्वं सिद्धति। तद्यथा—मूलं तावत् द्विविधम्, रेखात्मकमङ्कात्मकञ्चेति। तत्र रेखात्मकं मूलं येषां, तेत्ववर्गाङ्का वर्गाङ्काश्च। अङ्कात्मकं मूलं येषां ते तु वर्गाङ्का एव, यथा—भू-वेद-नव-भूप-तत्वादयः—१, ४, ९, १६, २५,.... येषां चाङ्कात्मकं मूलं न विद्यते ते त्ववर्गाङ्का द्वि-त्रि-पञ्च-षट्-सप्त-वस्वादयः—२, ३, ५, ६, ७, ८,....। तस्माद्वर्गाङ्कस्य पद [मूल] द्वयमवर्गाङ्कस्यैकं रेखात्मकं पदमिति सिद्ध्यति।

रेखात्मकमूलानयनं यथा—यथैकजात्यत्रिभुजभुजकर्णसंयोगस्थलेऽन्यतादृशजात्यत्रिभुजकोटिकर्णसन्धिस्तथा चतुर्दिक् चत्वारि समजात्यत्रिभुजानि संस्थापनीयानि। तथा कृते तज्जात्यत्रिभुजकर्णसमचतुर्भुजं तदन्तश्चोक्तजात्यत्रिभुजकोट्यन्तरसमचतुर्भुजं स्यात्।

अथात्र जात्यत्रिभुजचतुष्टयक्षेत्रफलयोगस्तज्जात्यत्रिभुजभुजकोटिद्विघ्नघातात्मकः (२ भु × को)। जात्यत्रिभुजे भुजकोटिघातार्धस्य क्षेत्रफलत्वात्। तदन्तर्गतभुजकोट्यन्तरसमचतुर्भुजस्य क्षेत्रफलं च तज्जात्यत्रिभुजभुजकोट्यन्तरवर्ग (भु^{२} २भु × को + को^{२}) तुल्यं स्यात्। अनयोः क्षेत्रफलयोर्योगे कृते भुजकोट्योर्वर्गयोगतुल्यं वृहत्समचतुर्भुजक्षेत्रफलं सिद्धम्। कर्णवर्गोऽपि भुजकोटिवर्गयोगरूपस्तेन कर्णवर्गोऽपि तत्फलमिति सिद्धोऽयं कर्णवर्गोऽस्य मूलं कर्ण इति।

अतोऽत्र निश्चितं यद्धि समकोणसमचतुर्भुजक्षेत्रफलस्यावर्गस्य पद(मूल) कल्पनं, तच्चात्र कर्णरेखास्वरूपमेव, परन्तु न तज्ज्ञानं संख्यया परिच्छिन्नं कर्तुमर्हम्। अतश्चैतद्रेखातिरिक्तं न ह्यङ्कात्मकं संख्यया मूलमिति सिद्धम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमनेतद्रेखात्मकमूलज्ञानेन परमाणोरपि सावयवत्वज्ञाननिश्चयो भवति। तथा हि "अप्रत्यक्षोऽणुपरिच्छिन्नपरिमाणः परमाणुरस्ति" इति स्वीकुर्वन्ति तार्किकाः। तत्र "द्वाभ्यां द्व्यणुकपरिमाणं, त्रिभिस्त्र्यणुकपरिमाणम्" इति परार्धान्त परमाणुभिरेको बृहत्परिमाणो भुजस्तावन्मिताकोटिश्च। अनयोर्भुजकोट्योर्वर्गयोगः कर्णवर्गस्सचावर्गाङ्कः, तुल्यवर्गयोगस्यावर्गाङ्कत्वात्। अस्य मूलं कर्ण इत्यतोऽवर्ग-पद(मूल)रूपकर्णस्य रेखात्मकस्य परमाणुरूपपरिमाणेन संमापने त्ववश्यमेवान्त्ये परमाण्वल्पपरिमाणं कर्णावशेषः स्यात्, तुल्यभुजकोटिवर्गयोगपदरूपकर्णस्योपपत्त्या सावयवत्वेनावगमादङ्कितस्तत्परिच्छिन्नमूलाभावात्। परमाणुवत्परमाण्वल्पपरिमाणादपि प्रोक्तयुक्त्या ततोऽप्यल्पपरिमाणसिद्धिरित्युत्तरोत्तरमुक्तकल्पनयाऽनन्तावयवाः सिद्ध्यन्ति।

ननु "सर्वारम्भकोऽवयवः सूक्ष्म एक एव निरवयवोऽस्ति, तादृशैर्बहुभिः स्थूलः, स्वल्पैः सूक्ष्मः" इति तद्युक्तयैव मेरुसर्षपयोः स्थूलसूक्ष्मत्वोपलम्भ स्यादिति चेन्न।

नह्युभयत्रानन्त्ये मेरुसर्षपयोः समत्वदोषोऽस्ति। आनन्त्यमात्रेण न तत्समत्वं तत्पिण्डयोः, किन्तु तदत्र परिमाणकृतमिति, तत्पिण्डयोरसमत्वादेकपरिमाणवशान्न कथमपि तयोः समत्वम्। अत एवोपपत्त्याऽनया परमाणोः सावयवत्वं सिद्धम्।

यदुक्तं भट्टकमलाकरेण स्वसिद्धान्ततत्त्वविवेके—"अहर्निशं रासभचर्चयैव कालो गतस्तर्कविदामतस्तैः। अवर्गमूलानवबोधयुक्तैर्ज्ञातो निरग्रः परमाणुरेव॥" इति

अत्र युक्तिः समीचीना प्रदर्शिता भट्टेन, परन्तु परिहासशैलीयं तेषां न शोभते, प्रत्युतौद्धत्यमेव प्रकटयति।

मम मते प्रत्यक्षदृष्ट्या परमाणोर्निरवयवत्वं तार्किकैः स्वीकृतम्। एवमेव ज्यौतिषसिद्धान्तेऽपि क्षेत्रमितौ—"यो नियतस्थानोऽपरिमाणो विभागानर्हः स बिन्दुः" इति बिन्दुपरिभाषा प्रत्यक्षदृष्ट्यैवोक्ता अन्यथैतत्खण्डनापत्तिरप्यापतेत्। यतः भट्टकमलाकरेण स्वयमेवोक्तम्—"सुयुक्ता न मुन्युक्तिरप्यत्र शास्त्रे भवेत् कार्यवर्यस्य या दृग्विरुद्धा" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौडीयसम्प्रदाये रसविमर्शः

ले० डा० श्रीसच्चिदानन्दचौधरी

कुलसचिवः, का० द० सं० विश्वविद्यालयः, दरभङ्गा

चैतन्यमहाप्रभोरनन्यभगवद्भक्त्या समुद्भूता वैष्णवभावना कालक्रमेण वङ्ग देशाद्—वृन्दावनस्य कुञ्जानागत्य यत् साम्प्रदायिकं रूपमधारयत्, तदेव गौडीय-वैष्णवसम्प्रदायनाम्ना व्यपदिश्यते। यद्यपि श्रीकृष्णचैतन्यस्य कस्यापि सम्प्रदायस्य प्रवर्तनमभीष्टं नासीत् तथापि तादृशस्य महापुरुषस्य परिधौ सम्पद्यमानं भक्तेरान्दोलनन्तस्यासंख्या अनुगामिनो भक्तास्तथा तेन प्रभाविता भक्तानां कवीनाञ्च कृतयः परवर्त्तिनि काले तस्य युगस्य भक्तिसंवलितां भावनामनायासेनैकस्य सम्प्रदायविशेषस्य संज्ञया समभान्त्सुः। अनेनैव कारणेन श्रीचैतन्यः अन्यवैष्णवसम्प्रदायानां प्रवर्त्तका इव प्रस्थानत्रयीं [ब्रह्मसूत्रं, श्रीमद्भगवद्गीता, श्रीमद्भागवतपुराणञ्च] न स्वीयेन भाष्येण भृषयामास, न वा कमपि साम्प्रदायिकं ग्रन्थविशेषमरचयत। तेन लिखिताः केवलमष्टौ श्लोका लभ्यन्ते, ये 'चैतन्यशिक्षाष्टक'—नाम्नाप्रसिद्धाः सन्ति। एषु श्लोकेष्वपि श्रीकृष्णस्य गुणा माहात्म्यं, तस्य कृपाप्रार्थना, भक्तेभ्यो नम्रताया उपदेश इत्यादिरेव वर्णितोऽस्ति। वस्तुतोऽयं गौडीयवैष्णवसम्प्रदायस्तादृशो दार्शनिकवैष्णवसम्प्रदायो नास्ति यादृशाः शङ्कररामानुजमाध्वनिम्बार्कविष्णुस्वामिवल्लभाचार्यैः प्रवर्तिता विभिन्ना वैष्णवभक्तेः सम्प्रदाया विद्यन्ते। सम्प्रदायेऽस्मिन् केवलं श्रीकृष्णं परमात्मानं मत्वा तस्य लीलानां गायनं कृतम्। भक्तेर्या धारा वैदिकयुगान्मन्थरगत्या प्रवाहिता दाक्षिणात्येषु वैष्णभक्तेषु संक्रान्ता प्रखरवेगाऽभवत् तथा व्यासस्य श्रीमद्भागवते, जयदेवस्य गीतगोविन्दे, विद्यापतेश्चण्डी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दासस्य च गीतेषु तरङ्गिताऽभवत्, सैवावसरमुपलभ्य श्रीकृष्णचैतन्यस्य मनसि महासागरे निलीनाऽभवत्। बृन्दावनस्य विशुद्धभक्तिलहर्याः द्रविडेषु कर्णाटकेषु महाराष्ट्रेषु गुर्जरेषु चानुगमनस्य संकेतः श्रीमद्भागवते समुपलभ्यते, बृन्दावनस्य भक्तिभावनैव गौडीयभक्तिभावनाऽऽसीत्। चैतन्यमहाप्रभोः गौडदेशसमुद्भूतत्वादेव वैष्णवभावनेयं गौडीयविशेषणेन मण्डिता बभूव।

यदि केनापि कारणविशेषेण गौडीया वैष्णवभक्तिः साम्प्रदायिकी भवति तदा तस्य सम्पूर्णं दायित्वं चैतन्यस्य शिष्येष्वेव,, चैतन्यस्य शिष्याः वङ्गे बृन्दावने च राधाकृष्णभक्तेः पूर्णं प्रचारं प्रसारञ्चाकुर्वन्। नित्यानन्दाद्वैताचार्येण वङ्गे षड्भिः शिष्यैः [गोस्वामिनाम्नाप्रसिद्धैः] बृन्दावने च हरिकीर्तनैः काव्यनिर्माणैः काव्यशास्त्रीयग्रन्थानां निर्माणैश्च यो वैष्णवभक्तेः व्यवस्थितः प्रचारो व्यधीयत स भक्तिसाहित्येतिहासे चिरस्मरणीयो भविष्यति। बृन्दावनस्य षण्णां गोस्वामिनां नामानि सन्ति— श्रीरूप -श्रीसनातन-श्रीजीव श्रीगोपालभट्ट-श्रीरघुनाथभट्ट-श्रीरघुनाथदासाः, एषु प्रथमे त्रयो गोस्वामिन एकस्यैव परिवारस्य। इमे विद्वांसो लेखकाश्च। एषामनेकाः कृतयः समुपलभ्यन्ते।— श्रीरूपगोस्वामिविरचिता इमे षोडशग्रन्थाः—

१—हंसदूतम् २-उद्धवसंदेशः ३-कृष्णजन्मतिथिविधिः ४-गणोद्देशदीपिका ५-स्तवमाला ६-विदग्धमाधवम् ७-ललितमाधवम् ८-दानलीला ९-दानकेलिकौमुदी १०-भक्तिरसामृतसिन्धुः ११-उज्ज्वलनीलमणिः १२-मथुरामाहात्म्यम् १३-आख्यातचन्द्रिका १४-पद्यावली १५-नाटकचन्द्रिका १६-लघुभागवतामृतम्।

सनातनगोस्वामिरचिताश्चत्वारो ग्रन्थाः प्रसिद्धाः 'बृहद्भागवतामृतम्' [द्वयोः खण्डयोः], हरिभक्तिविलासः, वैष्णवतोषिणी लीलास्तवश्च। जीवगोस्वामिभिरपि चत्वारः कृतयः प्रस्तुताः 'श्रीभागवतषट्सन्दर्भः' 'वैष्णवतोषिणी' 'लघुतोषिणी' 'गोपालचम्पूश्च'। रघुनाथदासगोस्वामिरचितास्त्रयो ग्रन्थाः समुपलभ्यन्ते 'स्तवमाला' 'मुक्तावली' 'दानचरित्रञ्च'। रघुनाथभट्टगोस्वामिनां गोपालभट्टगोस्वामिनाञ्च कोऽपि ग्रन्थो नोपलभ्यते। एभ्योऽन्येऽपि गौडीयवैष्णवभावनाप्रभाविताः कतिपये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कवयो लेखकाश्चाभवन् येषु अलङ्कारकौस्तुभस्य प्रणेता कविकर्णपूरः, काव्यचन्द्रिकाया रचयिता कविचन्द्रः, चैतन्यचरितामृतस्य लेखकः कृष्णदासकविराजश्च प्रसिद्धः ।

गौडीयवैष्णवसम्प्रदायस्य काव्यसिद्धान्तग्रन्थास्तेषां प्रयोगात्मिका परिणतिश्च

111067

शास्त्रस्य काव्यशास्त्रस्य वा दृष्ट्या पूर्वोक्ताः सर्वे ग्रन्था महत्त्वपूर्णा न वर्तन्ते । परन्तु रूपगोस्वामिरचितो 'भक्तिरसामृतसिन्धुः' 'उज्ज्वलनीलमणिः' 'नाटकचन्द्रिका' च, जीवगोस्वामिप्रणीतः 'प्रीतिसन्दर्भः' 'भक्तिसन्दर्भश्च, कविकर्णपूररचितः 'अलङ्कारकौस्तुभः' तथा कृष्णदासकविराजलिखितं 'चैतन्यचरितामृतमत्यधिकमुपादेयम् । वस्तुतः एते एव ग्रन्थाः वैष्णवसम्प्रदायस्य काव्यशास्त्रीयसिद्धान्तग्रन्थाः । एषां प्रयोगात्मिका परिणतिः 'चैतन्यचन्द्रोदयः' [ले० कविकर्णपूरः], 'जगन्नाथवल्लभः [ले० रामानन्दः], 'विदग्धमाधवम्], 'ललितमाधवम्' [ले० रूपगोस्वामी], एवमादिषु नाटकेषु 'कृष्णहितकौमदी' [ले० कविकर्णपूरः] 'गोविन्दलीलामृतम्' [ले० कृष्णदासकविराजः] 'कृष्णभावनामृतम्' [ले० विश्वनाथचक्रवर्त्ती] एवमादिषु लीलाकाव्येषु 'मुक्तचरितचम्पूः' [ले० रघुनाथदासः] आनन्दवृन्दावनचम्पूः [ले० कविकर्णपूरः] गोपालचम्पूः [ले० जीवगोस्वामी] एवमादिषु चम्पूकाव्येषु 'हंसदूतम्' 'उद्धवसन्देशः' [ले० रूपगोस्वामी] एवमादिषु काव्येषु एवं 'मुकुन्दमुक्तावली' [ले० अज्ञातः] 'विलासमञ्जरी' 'उत्कलिकावल्लरी' एवमादिषु गीतकाव्येषु च समुपलभ्यते । तेषु सर्वेषु काव्येषु नाटकेषु गीतिकाव्येषु वा लीलाकाव्येषु स्तोत्रेषु दूतकाव्येषु वा कृष्णस्तद्वल्लभाश्चालम्बनविभावाः । कृष्णं तद्वल्लभाश्चोपजीव्य भक्तिरसानुकूलानि आलम्बनोद्दीपनविभावानुभावसञ्चारिस्थाय्याद्युपकरणानि सन्निवेशितानि ।

हिन्दीभाषाया रीतिकालिकेषु सिद्धान्तग्रन्थेष्वपि अलङ्कारनिरूपणं रसविवेचनं नायिकाभेदादिकथनं कृष्णं रामं वाऽऽधारीकरोति । रीतिकालिककविर्भूषणः शिवराज–माधारीकरोति । सम्भवतो गौडवैष्णवरसशास्त्रस्यैवायं प्रभावः रीतिका-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिकेषु कविषु आचार्येषु च संक्रान्तः यत् ते सामान्यतो राधाकृष्णावालम्बनं कृत्वा काव्यशास्त्रीयान् सिद्धान्तान् व्यवस्थापयामासुः। तेषां काव्यात्मकपरिणतिश्च प्रस्तुता। देवः पद्माकरः विहारी घनानन्दः, रचनाभिः गौडीयभक्तिरसस्य प्रभावं विशदयामासुः।

पूर्वोक्तानांभक्तिरसात्मककाव्यसिद्धान्तानां प्रभावः अष्टानांमुद्राङ्कितानां कवीनां रचनासु सम्यक् समुपलभ्यते। सूरदासस्तु कथयति श्यामे दृष्टे सत्येव मानवो रसमुधायां निमज्जति। नन्ददासस्तु कृष्णभक्तेरमृतस्य सरोवरेण रूपकमुद्रया साम्यं प्रदर्श्य मोक्षादीन् तस्य निर्झरानेव साधयति। एतदुक्तं भवति — वैष्णवभक्तिरसस्य काव्यात्मिका परिणतिः न केवलं भक्तिकालिके रीतिकालिके च साहित्येऽपि समुपलभ्यते॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111067

मनीषा-नियमाः

१ इयं पत्रिका त्रैमासिकी भविष्यति ।

२ अस्यां पत्रिकायां संस्कृतवाङ्मयमधिकृत्य संस्कृतयागिरा, हिन्द्या, आङ्ग्ल-भाषया वा सन्दृब्धा रचनाः प्रकाशमेष्यन्ति ।

३ विवादस्य राजनीतेः सामाजिकसमालोचनाया वा विषये मनीषया सततमुदासिष्यते ।

४ लेखा एकत्रपृष्ठे स्पष्टाक्षरेषु लिखिताष्टाङ्किता वा स्वीकरिष्यन्ते ।

५ लेखप्राप्ति स्वीकृतिश्च सूचियिष्यते, परमस्वीकृतलेखानां परावर्त्तनस्य व्ययोलेखकैर्वोढव्यः स्यात् ।

६ कवितालघुकथादिसर्जनात्मकलेखानां मौलिकानामेवात्र प्रकाशनं सम्भवति ।

७ प्रकाशनार्था स्वीकृतिः सर्वात्मना सम्पादकेष्वायतते ।

८ अस्याः पत्रिकाया वार्षिकं मूल्यम्—१०) दशरूप्यकाणि प्रत्यङ्कञ्च ३) त्रीणि-रूप्यकाणि ।

९ मूल्यं सदैव पोष्टल आर्डरद्वारा कुलसचिवपदनाम्नाप्रेषणीयम् ।

क्षमायाचना

अतित्वरया कार्याणां सम्पादने ऽस्थितलेखानामपि समुचितन्यासवैधुर्येणामुद्रणेन न्यादृशेन वा ऽशुद्धिशोधनविरहाद्यात्मना स्खलनेन च खिन्नं सम्पादकमण्डलं क्षमां चमानमग्रिमाङ्कतस्त्रुटीरपाकर्त्तुं यथाशक्ति यतिष्यते । राच०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

२० सं० विश्वविद्यालयेन 'दि हिन्दुस्तान प्रेस' मुद्रणालये मुद्रयित्वा प्रकाशिता ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri